वै ॥ जनुः समजनेः शाकोभारद्वाजमिदंत्विदं ॥ ४५॥ यागोरीलक्ष्मीयुगजातिलक्ष्मीतस्याःशरांकाद्रिभि ७९५ रन्वितानि ॥ रामाष्ट
राग ८८३ प्रमितानितद्वच्छको भवेदेवहिजन्मकाले ॥४६॥ एकाभिवृध्याच ८८४ युतानितेष्वेंकाद्रि ७९५ भरद्वाजमतंतदुक्तं ॥ द्विवृ-
द्धि ८८६ युक्त्याचयुतानितानि ७९५ स्याज्जन्मशाको भृगुसंमितेन ॥४७॥ पुनश्चतुर्वृद्धि ८९० युतानितानि ८०० स्याज्जन्मशाकोऽत्रि
मुनेर्मतेन ॥ अष्टाभिवृध्या ८९८ चद्वयोःप्रयोगः ८०८ स्याज्जन्मशाकः किलकाश्यपस्य ॥ ४८ ॥ स्वरूपदायाः किलखेचरेन्द्रनेत्रा
णि २१४९ प्रोक्तानिमुनिप्रवर्यैः ॥ नवाब्धिवेदैश्च ४४९ विहिनितानिशाकोभवेच्चापि तथैकवृध्या ॥४९॥ युतानि २१४९ तेष्वेव
४५० भवेच्छकोऽपितथानवध्यांच २१५२ ॥४५८ गुरोर्मतेन ॥अन्येऽपिभेदा बहुशस्तथासांत्यूह्यानि धीरैर्हि[illegible]बुद्धियुक्त्या ॥ ५०॥
अन्यानिभेदानिमतांतराणिच द्वितीयतृतीययोर्वतंसयोर्दृष्टव्यानि ॥ ५१॥ ॥इतिसामुद्रिकेजातकसुधाकरेप्रथमावतंसेजन्मका-
लशाकनिर्णयोनामद्वितीयोऽध्यायः ॥ ॥अथद्वितीयरेखाव्याघ्रविलाससकाशाज्जन्मकालिनमासनिर्णयः क्रियते ॥ मासनि-
र्णयकालेयशाकेहीनेकृतेततथा ॥ प्रोक्तांकैः स्याज्जन्मकालमासःपूर्णक्रमेणच ॥ ५२॥ यथाक्रमिकयापूर्वजन्मशाकउदाहृतः ॥त
थातथैवक्रमतोमासनिर्णयउच्यते ॥५३॥ पूर्णायांद्वीपिविलासलीलायांप्रगूढशाको १६५१ विहीनतोंकैरेभिः ॥ खेचरदरसाब्ज १६४९ प्र
मितैस्तुशेषांकप्रमितो १०जनुकालमासः ॥५४॥ संगूढदेहरेखायाः शाके १६५१ तैरेव १६४९ विहीनिते ॥ जनिमासभवत्येवं १० गदितंच
मतांतरं ॥ ५५॥ इतिमृगीगतिनाग्ययोर्मासनिर्णयोज्ञेयः ॥ अथवाराहिकायामासनिर्णयःकथ्यते ॥ चाराहीनामरेखायात्रेत्रांगनृप
संमितैः १६६२ विगूढदेहशाके १६६९ स्मिन्हीनेउत्पत्तिमासकः ७॥ ५६॥ समुद्रदेहात्क्रयरेखिकायाः शाके १६९३ भिखेदांगशुभ्रांशुभिर्नैः १६१
३ श्च ॥ हीनोहिमासो भवतीतिपक्षेपरेभ्निनागांगधरै १६८३ र्विहीने ॥५७॥ अत्रश्लोकेगौर्याःशाकइत्यध्याहारः॥ कुमुख्यामासमाह ॥
मायाः शाके १६४८ नागरामाग्निचन्द्रै १६३८ र्हीनेकुमुख्योभवेज्जन्ममासः १०॥ पक्षांतरेप्येवमेवंविधेयंजनुःकालमासोभवेद्धैनरस्य
॥५८॥ मतांतरेणाह ॥रमायाश्चशाके १६९२ भिनागांगचन्द्रै १६८३ र्विहीनेकृतेपूर्वजन्माख्यमासः ॥ मतंतुचेदंमुनिवर्यकाणांस्तदा

प्रमाणंवचनंहितेषां ॥ ५९॥ कृष्णकचायामासमाह ॥ परगूढायाः शाके १६५२ खबाणरसचन्द्रै। १६५ र्विहीनिते कृष्णकचायामासः
।मतांतरेचतैस्तैरेवहीनेकृतेभवतीतिजन्ममासः ॥६०॥ पांसुलायाश्चमासानाह ॥ निगूढरेखायाः शाके १६७७ नेत्राद्रिरसभूमिभि १
६७२ ॥ हीनिमासः पांसुलातोजन्ममासः ५स्मृतोबुधैः ॥ ६१॥ विराड्भूतेर्मासमाह ॥ अतिलक्ष्म्यायाः शाके १६५१ वह्निवेदभूपै १६
४३ र्विहीनेस्यात् ॥ विराड्भूतेर्मासो ८ गदितोजन्मकालस्यतज्ज्ञैः ॥ ६२॥ यत्रयत्रवृद्धियुतः शाकोयस्ययस्यरेखागदिताविद्वद्भिः ॥
तत्रयेषुविहीनः खाभ्रसप्तचन्द्र १७०० संमितेषु ॥६३॥ शेषेद्वादशपुष्टेरवि १२ भक्तेच्चशेषंजन्ममासोभवेत् ॥ मासस्तुचैत्रगरुतःसुस्ला
प्रोक्तंजातकज्ञैः ॥६४॥ अन्यदाह ॥सुखभोगदायाः शाकस्त्रिसप्तरसभूमि १६७३ तःप्रोक्तः ॥ तस्मिन्हीनेवह्निरसभूपै १६६३ जन्म
मासभवतिनूनं ॥ ६५॥ विस्तारमालोक्यचरेखिकाणांसमासतःप्रोक्तमिदंसुमृग्यं ॥ विस्तारमेतस्यविलोकनीयंबृहत्सुधाज्जातकना
मग्रंथे ॥६६॥ ॥इतिजातसुधाकरेजन्ममासप्रकरणंतृतीयोध्यायः ॥ अथपक्षनिर्णयःक्रीयते ॥ संजायतेयस्यकरेस्फुरंतीसंगू
ढदेहागदतस्तदानीं ॥ नरःप्रसूतेसमयेमुनीन्द्रैः पक्षस्तुकृष्णः किलजातकज्ञैः ॥६७॥ यिगूढदेहायस्यास्तिहस्तेसपुरुषोत्तमः ॥
शुक्लपक्षेप्रसूतोवैज्ञातव्यो जातकोत्तमैः ॥६८॥ गौरीनाम्नाचयस्यास्तिपाणौसपुरुषःप्रभुः ॥ कृष्णांतेशुक्लप्रारंभेसंजातःकथ्यतेबु
धैः ॥६९॥ मतांतरेतु ॥हस्तेगौरीनामरेखानरस्यभागंलीलासौख्यमुक्तंफलंच ॥उत्पत्तिर्वैतस्यप्रोक्तामुनीन्द्रैःशुक्लेपक्षेगार्ग्यविप्रैः
स्यवाच्यं ॥७०॥रमानाम्नीचयस्यास्तिरेखाकरतलेशुभाः ॥ जनस्यतस्यचोत्पत्तिः शुक्लपक्षेउदीरिता ॥७१॥ अन्यच्च ॥ रमारेखोत्तमा
यस्यशुभापाणितलेभवेत् ॥तस्यजन्मसुधैः प्रोक्तःशुक्लपक्षेतिनिर्मले ॥ ७२॥ यदिभवतिचरेखापाणिगामानवानांशुभफलजनिकालै
र्नामरात्रुप्रगूढा ॥ भवतिनिखिलभोगस्थानरूपोमनुष्योजननसमयपक्षःप्राहुरेवंनकृष्णं ॥ ७३॥ निगूढनाम्नी किलपाणिगावैरेखा
यदायस्यनरस्यहस्ते ॥ भवेदसौशुक्लगतःप्रसूतोयुक्तश्चपुत्रैः सुखभुक्तभाक्च ॥७४॥ नाम्नीतिलक्ष्मीकिलपादपद्मेयस्या
स्तिपाणौसुखभोगदावैरेखाचतस्यापितथैवज्ञेयंफलंसुखंभोगविलाससुक्तं ॥७५॥ सुखाप्रगूढायदियस्यहस्तेभवेच्चतस्यापि

जनिर्हि शुक्ले ॥ यस्यास्ति हस्ते किल चाति लक्ष्मीस्तस्यापि शुक्ले गरुति प्रसूतिः ॥ ७६ ॥ तिलकांकायदा रेखा परगूढा जनस्य वै ॥ वर्तते तस्य च प्रो
क्तं जनस्य धवले जनिः ॥७७॥ कुबुद्धिकारिणी रेखा यस्यास्ति हृदये शुभा ॥ तस्य सूतिः शुक्लपक्षे सम्प्रोक्ता महसां बुधैः ॥७८॥ सैव स्याद्यदि
पुंसो वै तिलकांकितविग्रहा ॥ तदा तस्य जनिः प्रोक्ता शुक्लपक्षे मनीषिभिः ॥७९॥ रमा यदा तिलैर्नोक्ता रेखा तस्य शितेतरे ॥ तयाविधायां
गौ पंचि विपरीतं स्मृतं बुधैः ॥८०॥ निगूढदेहा च यदा तथाभूता जनस्य वै ॥ अस्ति पाणितले तस्य सूतिः कृष्णे च पक्षके ॥ ८१ ॥ निगूढदेहा
न्वपदा तिलकेनोक्ता यया बुधैः ॥ जनुः समपजः पक्षः कृष्ण इत्यभिधीयते ॥८२॥ संगूढदेहा यस्यास्ति पाणौ तस्य जनिः शिते ॥ विगू
ढदेहान्च तथा कृष्णपक्षजनिः प्रदा ॥८३॥ संगूढदेहान्च विगूढदेहा निगूढदेहापरगूढदेहा ॥ एतान्चतस्रः किल कृष्णपक्षे जन्मप्रदा
गार्ग्यमुनेर्मतेन ॥८४॥ सैषाश्च सर्वाः खलु शुक्लजन्मप्रदाश्च रेखाननुमानयस्य ॥ विलोमरीत्या च तथा नरस्य पक्षः प्रदिष्टः किल
काश्यपेन ॥८५॥ मतांतराण्यत्र बहूनि संति विलोमरीतिप्रमुखानि तद्वत् ॥ सारं च तेषां प्रविलोक्य चैतत्कृतं मया लक्षणभूमिकेयं ॥
८६॥ ॥इति जातकसुधाकरे पक्षप्रकरणं चतुर्थोऽध्यायः॥ ॥ अथ तिथिनिर्णयः॥ अंत्यायां रेखा शीलगुणस्वरूपा तस्या निर्णयमु
क्तं विद्वद्भिस्तु नूनं ॥ रेखा यदा स्याज्जगति नरस्य करस्थले शीलगुणस्वरूपा ॥ प्रोक्तस्तदा तस्य नरस्य जन्म नूनं चतुर्थ्यां किल जातक
ज्ञैः ॥ ८७ ॥ यदा कुमारी खलु पाणिपद्मे जनस्य मृतं तनुः खलु नैसुधीभिः ॥ तिथौ द्वितीयायुतसंज्ञकायां भाग्याधिकः स्यात्सतु रूपवांश्च ॥
८८ ॥ धृतिर्विशाला खलु यस्य हस्ततले भवेतस्य तिथिर्हि नागी ॥ जातो रमण्यं किल सत्स्वरूपकांत्या तिथौ नाहरिवासरे हि ॥८९॥ य
स्यास्ति हस्ते त्रिपदी जनस्य तस्यापि सूतिः किल शंभुतिथ्यां ॥ हस्ते यदा यस्य जनस्य रेखा नाम्ना पुलोमी जनिरस्य षष्ठ्यां ॥ ९० ॥ हस्ते रे
खा वैश्वदेवी भवती यस्य तस्य जन्म सप्तम्यां ॥ तिलसंयुतायां तस्यां वै जन्म प्रोक्तं बुधैः प्रतिपदि ॥९१॥ गांधार्यायां द्वितीयायां तिलयु
क्तायां जन्म पंचम्यां ॥ चंपकमालायां हस्ते जन्मतिथिः स्मृता नरस्य जन्मतिथिः ॥९२॥ तिलसंयुक्तायां तस्यां जन्मतिथिश्चाष्टमी बुधैः
प्रोक्ता ॥ कुमार्यां तिलसंयुक्तायां नवमी जन्मतिथिस्तस्य नरस्य ॥९३॥ धृतिर्यदा तिलसंयुक्ता च रेखा भवेदसौ जन हस्ते तदास्य

तिथिर्यमीखलुप्रोक्तासुधीभिस्त्रिपद्यांपौर्णमासिबुधैः ॥९४॥ वैश्वदेवीतिलयुक्ताजनहस्तेविधुक्षय३० जन्मदा ॥ सेनानित्वप्रदायांहस्ते
सत्यांजन्मत्रयोदश्यां ॥९५॥ जगतिरेखाशुद्धायस्यनरस्यजन्मद्वादश्यां ॥ कुमार्यांचशुद्धायांहस्तेसत्यांजन्मतृतीयायां ॥९६॥ धृत्यांच
खलुशुद्धायांपंचमीतिथिजन्मनिउक्ता ॥ रमण्यांचशुद्धायांदशमीप्रोक्ताजन्मतिथिर्नुः ॥ ९७॥ गांधार्याश्चत्रिपाद्याजन्मतिथिःक्रमे-
णदशमीनवमी ॥ चंपकमालायांशुद्धायांतिथिर्जन्मतुःपौर्णमासी ॥९८॥ सौराज्यपदप्रदाराज्यांजन्मतिथिसाम्राज्यदायांप्रतिपत्
॥साम्राज्यप्रदायांशुद्धायांषष्ठीतिरुसंयुक्तायांहरिदिनं ॥९९॥ मतंचैतद्गार्ग्यंभूयोऽपिमतांतरंप्रवक्ष्यामि ॥ रेखाजगतीहस्तेतस्य
जन्मद्वादश्यांप्रोक्तं ॥१००॥ मतांतरमाहगार्ग्यः ॥जगतिरेखायस्यचेद्भवतिपाणिपद्मेतस्यांप्रासासूज्ञैर्जन्मतिथिःषष्ठी ॥ कुमार्य्यांच-
नवमीधृत्यांचजायतेमनुजस्यजन्मतिथिःपंचमीच ॥१०१॥ रमण्यांहस्तेचसत्यांजनस्यतिथिरेकादशीत्रिपद्यांच ॥ वासव्यांखलुह
स्तेसत्यांजनुषोदशमीतिथिरुक्ता ॥१०२॥ वैश्वदेवींचरेखासुक्तातिथिर्द्वादशीगांधर्व्याषष्ठी ॥ चंपकमालायांशैवीविष्णुप्रियासेनानि
त्वप्रदायास्यात् ॥१०३॥ महाराज्यप्रदायांद्वितीयासौराज्यपदप्रदात्र्यांपंचमीजनुषी ॥ साम्राज्यदायांरेखायांपितृतिथिर्गार्ग्यमतं
चैतत् ॥१०४॥ अथमतांतरमाह ॥कुमार्यांप्रतिपत्प्रोक्ताधृतौचैवद्वितीयका ॥ तृतीयांचचतुर्थ्यांवैपौलोम्यांचचतुर्थिका ॥ १०५॥
वैश्वदेव्यांपंचमीस्यात्गांधर्व्यांस्कंधस्वामिनी ॥ भास्करीचंपकाख्यायांदरिद्रायांतदष्टिमा ॥ १०६॥ कुथाहण्यांचनवमीप्रमीच-
पलुनालिका ॥ सेनानिदायांहरिजंमहाराज्यायांचद्वादशी ॥१०७॥ सौराज्यायांविश्वतिथिःसाम्राज्यायांचशैविका ॥ शुद्धायांशी-
लरूपायांतिथिरुक्ताचपौर्णिमा ॥१०८॥ एतन्मतंमनूनांचप्रोक्तंशुद्धंतिथेर्विधौ ॥ मतांतराणिचान्यानिज्ञेयानिचबुधैस्तदा ॥१०९॥
॥ इतिजातकसुधाकरेतिथिनिर्णयोनामपंचमोऽध्यायः ॥ ॥अथजन्मनीष्टकालसाधननिर्णयः॥ ॥धरबिंबविडंबिताविद्रु-
मंवदनचंद्रविवर्जितपंकजं ॥स्वतनुकांतिजडीकृतनीरदंकमपिगोपकुमारमुपास्महे ॥ ११०॥ अथजन्मइष्टकालज्ञानार्थंचध्रु
वांकान्याह ॥ जगत्याश्चध्रुवांकानित्रयोदशात्तयात्रयः ॥१३।३॥ कुमार्य्याश्चतथैवास्युर्ध्रुवांकानि१२।३ धृतेरथ ॥ १११ ॥

॥अथजगत्याध्रुवांकानाह॥

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६
जगति	कुमारी	धृति	रमणी	त्रिपदा	वासवी	वैश्वदेवी	गांधारी	चंपकमाला	दरिद्रदा	महाराज्यप्रदा	कुग्राहिणी	साम्राज्यप्रदा	चपलवक्री	साम्राज्यप्र-	सेनानिलदा
१३।३	१३।१३	२६।६	५।५	७।७	७।६	३।१०	७।७	५।५	३।७	७।५	२।७	३।११	५।१२	७।५	५।१२

षड्विंशतितथाषड्रमण्याःपंचपंचवै । त्रिपद्यासप्तसैलाःस्युर्वासव्यासप्तषट्तथा ॥११२॥वैश्वदेव्यास्त्रयःखंचगांधर्व्याःसप्तसप्तवै। पंचबाणास्तथाचंपकमालायाःस्मृताबुधैः ॥११३॥ दरिद्रास्यास्त्रयःसप्तध्रुवांकाःपरिकीर्त्तिताः । कुग्राहण्यास्त्रयःसप्तपंचनेत्राबुधैःस्मृताः ॥११४॥ चपलमुखायारेखायासेनानिपदसंज्ञिकाः ।तस्याःपंचतथाद्वौचतद्ग्रायाश्चपंचच ॥११५॥ तथासप्तबुधैःप्रोक्ताध्रुवांकामुनिसंमताः ।सौराज्यपददात्र्याश्चगुणरूपाध्रुवास्तथा ॥११६॥ साम्राज्यदाश्चसप्तपंचप्रोक्ताध्रुवाबुधैः॥ अथासांसुलभज्ञानायध्रुवांकानांरेखाणांचचक्रन्यासः ॥अथैताभ्यांइष्टकालमाह॥ जगत्याध्रुवांके १३।३ स्तिथिर्जन्मकालोभूताचगुण्याभवेदिष्टकालः ।. धृतेर्वैध्रुवांके२६।६र्गुणैःपूर्ववत्स्यात् त्रिपद्याश्चगुण्यैरसैःसंयुतेच ॥११७॥ रमण्याध्रुवांकैस्तिथौसंगुणेश्चचतुर्भिर्विहीनेभवेदिष्टकालः। ध्रुवांकैश्चगुण्येतितिथौवैश्वदेव्याचतुर्भिर्विहीनेभवेदिष्टकालः ॥११८॥गांधर्व्याश्चध्रुवांकैर्गुणितेतिथाविष्टकालःस्यात् । त्रिपद्याश्चगुणितंकैस्तिथ्यावेदविहीनंपूर्ववच्च ॥११९॥ अन्यदाह ॥ चंपकमालाध्रुवकैर्गुणितैस्तिथ्याजायतेइष्टः । त्रिहीनंगार्ग्यस्यषड्हीनंवैशंपायनस्य ॥१२०॥ अत्रेर्मैत्रेचदंके रूणेतस्मिन्न्येवांकेपूर्ववदिष्टंमहाराज्यप्रददायाध्रुवकैर्गुणिते ५।७ तिथौचेष्टं ॥१२१॥ गालवकाश्यपयोरेक १ भिरूनेजायतेइष्टं ॥जनुषः॥ गार्ग्यगौतमपक्षेक्रमतःशीघ्रगैःरवेचरैश्च ॥१२२॥ साम्राज्यदायाध्रुवकैर्गुणितेतिथौनिरेके१च॥ भवत्येकजन्मकालेपुंसइष्टकालरेखायाः ॥१२३॥ सेनानिलदायाददातिहरेखाध्रुवैस्तस्याःसंप्रगुण्यास्तिथिश्च । स्याद्वाउत्पत्तेश्चइष्टःसुसत्यंप्रोक्तंविद्वद्भिःपुराणैरभीष्टं॥ १२४॥ दरिद्रदायाध्रुवकानि ३।७ नित्यांसंयोजयेज्जन्मतिथौनरस्य ।संजायतेजातकसंमतेनत्वेष्टस्यकालोगदितोमुनीन्द्रैः ॥१२५॥ यत्रकुत्रास्तिचेष्टस्यकालेषष्ट्युधिकेतथा। षष्ट्याभिर्जरयेदिष्टंशेषंसप्तयुतंचतत् ॥१२६॥ कुग्राहिण्यांस्तथाशेषदिग्युतेचेष्टकालकः। वक्ष्याम्यन्यमुपायं

तुमतांतरं पुरागमं ॥१२७॥ जगतीनामिकारेखावर्ततेयस्यपाणिगा । इष्टकालोबुधैःप्रोक्तोद्विबाण२५पत्तिथिष्१५क्रमात् ॥१२८॥ य-
स्यास्तिपाणौचधृतिरिष्टं तस्यापिपूर्ववत् ५२।१५ ॥ कुमार्य्यांविद्यमानायां पंचबाणाश्च५५ रवंशराः ५०॥ १२९॥ रमणीनामयस्यास्ति
रेखाकरतलेशुभा । प्रोक्तमिष्टंतदात्वन्द्रेवेदा ४१श्चाथसुधामयः १ ॥१३०॥ रमण्यामपिरेखायामंकवेदा ४९स्तथाग्नयः ३। त्रिपद्यानागरामा
वैशैलाः ३८।७ प्रोक्तामनीषिभिः ॥१३१॥ वासव्यांवर्तमानायां प्रोक्तशैलेन्दु १७संज्ञकं ॥ सप्तबाणा ५७वैश्वदेव्याः ४५ पंचवेदाऽथवन्ह
यः ३ ॥१३२॥ गांधार्य्यांपाणिगायांवैपंचरामास्तथैवच २५।३५॥ इष्टकालंजातकज्ञैर्बुधैःप्रोक्तंनरस्यहि ॥१३३॥ चम्पकस्यचनाम्नो
वैसत्यांपाणितलेबुधैः ॥ पंचतत्वानि ५।२५ चप्रोक्त इष्टकालोहिनिश्चयात् ॥१३४॥ दरिद्रायांरूपरवंवै १।० कुग्राहिण्यांरवीरवः १२।१
॥ चपलास्ययुतायांचरत्नानिमुनयस्तथा ॥१३५॥ सेनाधिपत्यदायांचसप्तविंशतुरंगमाः २७।७ ॥ महाराज्यप्रदायांवैनवरत्नानिच१४
।९क्रमात् ॥१३६॥ सौराज्यदायांरेखायांनवबाणास्तथाग्नयः ५९।३ ॥ साम्राज्यदायांरेखायांपाणिगायांनवाग्नयः ३९॥१३७॥ इष्टका
लंजनुषः स्यात्प्रोक्तंजातककोविदैः ॥ यत्रकुत्रापिपूर्वोक्तेविषयेचेष्टकालजे ॥१३८॥ तस्मिन्षष्ट्याधिके भागंषष्ट्याकार्यंबुधैःसदा ॥ शे
षांकेप्रोक्तमिष्टस्यान्यनामज्ञैर्मनीषिभिः ॥१३९॥ मतांतराणिस्युर्यत्रबहूनिविमलानिच ॥ तान्यत्रनैवप्रोक्तानिविस्तराच्चसमासतः ॥
१४०॥ संदृश्यानिचतान्येकग्रंथान्तरमतेषुच ॥ १४१॥ इतिजातकसुधाकरे इष्टकालनिर्णयंनामषष्ठोऽध्यायः ॥ अथायुःप्रमा
णमाह ॥आयुःप्रमाणंकिलजातकज्ञैः प्रोक्तंप्रकारैर्बहुभिर्जनस्य ॥ तत्रापिवक्ष्यामिसमासतोवैरेखावशाद्दैवविदांहिताय ॥१४२॥ आयुः
प्रमाणंसर्वाभ्योरेखाभ्यःक्रमतोबुधैः ॥ प्रोक्तंवैतत्रभेदानिवक्ष्यामिजनहेतवे ॥१४३॥ यस्यरेखाप्रगूढाख्या वर्ततेपाणिपंचके ॥ तस्यप्र
माणंविज्ञेयोआयुर्विंशतिरुच्यते ॥१४४॥ गौर्य्याःपंचांक९५ प्रमितारमायाःखगुणा ३० स्तथा ॥ परगूढदेहानाम्न्यांवैज्ञेयाचायुष्यविंश-
तिः २० ॥१४५॥ अखण्डितस्यसर्वायुःप्रोक्तंखयमचंद्रमाः १२० ॥ विगूढदेहेरेखायाःप्रोच्यतेचतथाबुधैः ॥१४६॥ निगूढदेहरेखायाः
खंचातिलक्ष्म्यानखोन्मिता२० ॥ अतिलक्ष्म्याःपंचगुणाः ३५ प्रोक्तमायुर्मतंमुनेः ॥१४७॥ सुरूपदायारेखायाआयुःशून्यंबुधैःस्मृतं॥

सुखभोगदात्र्यंगानि ६३ नवाब्धि ४९ गजनाम्निका ॥१४८॥ ददातिपुरुषंचायुः कुबुध्याः पंचसप्तकाः ७५ ॥ सर्वसौख्यविनाशिन्या
आयुरभ्रं०स्मृतंबुधैः ॥ १४९॥ मृगीगत्याश्चरेखायाःकरपंच ५२उदाहृतं ॥ नाग्यारूपं १स्मृतंचायुर्वाराह्यागजट संमिताः ॥१५०॥
सुभद्रदेहायांचायुः पयोनिधिगजाः ८४स्मृताः ॥ कुमुख्यास्तत्वसंख्यानि २५ कृष्णाकेशानचोन्मिताः ॥ १५१॥ पांसुलायाःपंच५
मासाविराड्भूतेरपांनिधिः ४ ॥अनंतायाश्चरेखायांद्वि२मासःपरिकीर्त्तितः ॥ १५२॥ वसुंधराह्वयापंच५दिनानिसुनयोजगुः ॥श्वां
तिमत्याश्चैक १दिनंशीवत्याश्चघटीद्वयं२ ॥१५३॥ निकृष्टायाःपंच५घस्यःपद्मवत्यानवाग्नयः ३९॥ तुरंग्याःपंचरूपाणि१५ मातं-
ग्याःसंस्मृताकरौ ॥१५४॥ सार्वभौमाःपंचकरो२५जगत्याःखनव९०स्मृताः ॥ कुमार्य्यागुणरूपाणि१३ धृतेःप्रोक्ताकराब्धयः४
२ ॥१५५॥ रमण्यापाःपंचनागा न्यदल्लिपद्मानवति९०स्मृताः ॥ इन्द्राण्याःसप्ततिप्रोक्ता७० वैश्वदेव्यानवाधिका९९ ॥१५६॥गां
धारीनामरेखायाःपरमायुर्द्वि२मासकं ॥ धृति१८श्चंपकमालायादारिद्र्याःपंचपंच५५वै॥१५७॥ कुम्राहिण्याश्चरुद्रा११स्युःपर
मायुःप्रकीर्त्तितं ॥ चपलायाःकराब्धि४२श्चजातकज्ञैर्मनीषिभिः ॥१५८॥ योगेऽयसर्वायुषस्तुस्पष्टमायुर्भवित्यहो ॥ यासांमा
समिमंप्रोक्तंघटीदिनसमंतथा ॥१५९॥ तासांयोगेनकर्त्तव्यःकेषांचिदितिसंमतं ॥ इतिजातकसुधाकरे आयुःप्रकरणंसप्तमोऽध्या
यः ॥ अथनदरेखायाप्रणयनमाह ॥ उक्तञ्चतत्रैव ॥ ॥रेखात्रित्तयतोभिन्नायारेखास्वल्पमूर्त्तिभृत् ॥ नदरेखेतिसाप्रोक्तातस्याः
पुण्यंमहोदयं ॥१६०॥अणुरूपायदारेखा पूर्वोक्तासापिभोगकृत् ॥ किंपुनःसर्वदेहाह्वानदरेखामहत्फला ॥१६१॥ असंकीर्णायदारे
खासाप्रोक्ताचमहानदी ॥ यस्याःफलंमहत्प्रोक्तं बुधैर्जातककोविदैः ॥१६२॥संकीर्णाचयदासास्याद्रेखावैनदनामभाक् ॥ सदा
सांकुरुतेनॄणांमहाराज्यपदंशुभं ॥१६३॥ नदरेखामहाभाग्यंकुरुतेसर्वसंपदं ॥ महानदीचयारेखासाकुर्यात्क्षितिपंनरं ॥१६४॥
संकीर्णानदरेखावैसाम्राज्यंकुरुतेचतुः ॥ यदासातिलकसंयुक्ताजायतेनदरेखिका ॥१६५॥ स्वराज्यभाग्यंकुरुतेनरंभाग्याधिकंस
दा॥ नदारव्यारेखिकापुंभिःसुलभाःपूर्वसंचितैः ॥१६६॥ इतिजातकसुधाकरेनदरेखाप्रणयनंनामाऽष्टमोध्यायः ॥

॥अथसुभद्रदेहरेखायाजन्मकालनिर्णयमाह ॥ ॥मासांकःखंकर्णसमः पक्षपावकसंमितः ॥ तिथ्यःसप्ताश्चप्रमितानागरा
मातयेष्टके ॥१६७॥ शकांकःषट्पंचयुक्तोजन्मशाकःप्रकीर्त्तितः ॥ मासांकोरवि१२भक्तश्चशेषेजननुमासकः ॥१६८॥ पक्षां-
कः कर्ण२ भक्तश्चशेषेजननकोगुरुत् ॥ तिथ्यंकःपंचचन्द्रै१५श्चहृतःप्रासविकीतिथिः ॥१६९॥ इष्टांकःषष्टि६०गुणितोनाग
नागै८८र्विभाजिता ॥इष्टकालःप्रभवतिघटीपूर्वस्तुजन्मनि ॥१७०॥ ब्राह्मीनाम्याश्चरेखायाःकर्णवेदशरेन्दवः ॥ सिद्धांकः
शाककालीनः पञ्चेन्दु१५र्मासकोमतः ॥१७१॥ पक्षभेदमितःपूर्वःषोडशःप्रमितस्तिथौ ॥इष्टांकःषट्शराःप्रोक्ताःप्रसवे
मानुषस्यवा ॥१७२॥ शकांकःशाकविधुमित्युक्तःशाकःप्रजायते ॥ सुभद्रदेहरेखायाःकर्णचत्वारिलोचनाः २५२ ॥१७
३॥ शकेनिगदिताअंकामासेमनुरुदीरिताः १४ ॥पक्षेयुगलकःप्रोक्तोवह्निरामः३३ मितस्तिथौ ॥ इष्टकालेऽथरवांगा-
द्रियुगलं२७६० परिकीर्त्तितं ॥१७४॥ शकांकससगुणितंनिरेकेच१जगुः शकाः ॥ मासांकेद्वादश१२हृतेशेषेमास
श्चजन्मनि ॥१७५॥ द्वि२भक्तेपक्षेसिद्धांकेशेषेपक्षःप्रजायते ॥ षोडशांशे१६तिथेरंकशेषेचजनुषस्तिथिः॥१७६
॥इष्टकालिनसिद्धांकःखतर्कै६०श्चविभाजितः ॥ पुनर्विभाजितस्तैश्चजायतेचेष्टकालिकः॥१७७॥ ॥अथ
सुभद्ररेखायाउदाहरणमाह ॥सुभद्ररेखायाःशकांकः २५२ससगुणितः १६१४ निरेकेजातः शकः १६५३ मासांकः १४ द्वादशै-
१२र्भक्तः शेषं२ जातोमासः चैत्रादिमासगणनयाज्येष्ठः पक्षांकः २ द्वि२भक्तंशेषं० जातःपक्षः।ज्येष्ठकृष्णपक्षोज्ञेयः । तिथेःसिद्धांकः
३३ अयंषोडश१६भक्तः शेषं१ जातातिथिःप्रतिपत् । अथेष्टकालांकः २७६० खतर्कै६० र्भक्तेजाताजन्मकालिनोघट्यात्मकः ४६।
० इष्टकालः शेषंचांकाभावात्शून्यमेवधृतं । एवंजातः सुभद्रदेहेरेखातः जन्मकालनिर्णयः ॥ इतिजातकसुधाकरेसुभद्रदेहरेखा
निरूपणंनामनवमोध्यायः ॥ अथप्रल्हादप्रणीतहस्तसामुद्रिकं ॥अथातःसंप्रवक्ष्यामिहस्तसामुद्रिकंशुभं ॥ प्रशस्यतेविशेषेणहस्तः
पंचांगुलस्तथा ॥१७८॥ विशेषाद्दक्षिणःपुंसांवामःस्त्रीणांतथास्मृतः ॥ रेखानिसर्गजायत्रकालेनैमित्तिकास्तथा ॥१७९॥ मणिबंधेकंसा-

रव्याश्चतस्रोभोगरुक्षणाः ॥ राज्ञांतिस्रस्तुनारीषु कामिन्यांद्वितयंस्मृतं ॥ १८०॥ अंगुष्ठपर्वणीद्वेतुत्रीण्यन्यासामुदीरिते ॥ पर्वान्तरेपर्वणिच
रेखाःस्युःफलदायकाः ॥१८१॥ अंगुष्ठाग्रंतुतर्जन्यांद्वितीयंपर्वसंस्पृशेत् ॥ शिल्पेचलेखनेशस्त्रविद्यायांवाबलाधिकः ॥१८२॥ अनामिकातृ-
तीयेचसमुत्तुंगाकनिष्ठिका ॥ बंधुश्रेष्ठ्यंप्रकुरुतेधनाधिक्यंचपौरुषं ॥१८३॥ पर्वान्तरालंसूक्ष्मंच पृथुपर्वयदाभवेत् ॥ संयोजनेछिद्रदर्शी-
निर्धनोभवितानरः ॥१८४॥ अंगुष्ठस्यतुपर्वान्तर्गोधूमयवरेखिकाः ॥ सूचयंत्यपिमिष्टान्नंधनधान्यादिसंपदः ॥१८५॥ शंखचक्रंचकलश
मंगुल्यग्रेषुदृश्यते ॥ त्रिचक्रमेककलशंशंखमेकं प्रभुर्भवेत् ॥१८६॥ अंगुष्ठांगुलिपर्वान्तश्चतुष्कोणं भवेद्यदि ॥ सभूजीवनमाप्नोतिम
ण्डलेश्वरसन्निभः ॥१८७॥ अन्यासामंगुलीनांतु चतस्रस्तुंगरेखिकाः ॥ पर्वान्तरालेऽत्तुंगा भवंतिशुभलक्षणाः ॥१८८॥ भोगाधिक्यं
न्वतसृभिस्तिसृभिःसमभोगता ॥ द्वाभ्यामत्यल्पभोगःस्यादेकरेखाविभागकृत् ॥१८९॥ रेखाभावेमहत्कष्टंकलशंमध्यमोत्तमे ॥ शुक्ति
कंशंखरेखावाकनिष्ठाग्रेऽधिकं धनं ॥१९०॥ तिसृष्वन्यासुचक्रंतुदक्षिणावर्तमुत्तमम् ॥ प्रभुत्वमधिकारंवाप्राजापत्यंचसूचयेत् ॥१९१॥ वैक
ल्येयोगभंगःस्यात्साकल्येतुमहाफलं ॥ कासांचिदंगुलीनांचेत्कल्पत्यब्दैःस्याद्विपर्ययः ॥१९२॥ विनांगुष्ठमधःस्याच्चेदंगुलीनामृजुद्वयं
संसारिलक्षणंब्रूते विपरीतेविपर्ययः ॥१९३॥ क्रीडाविद्याभोगपुण्यफलमंत्यादिकीर्तितं ॥ सूक्ष्माभ्यामृजुरेखाभ्यांतद्भंगेभंगसंभवः ॥१९
४॥ अंगुष्ठकरमध्येतुरेखाऋज्वायताभवेत् ॥ सम्पूर्णहस्तपर्याप्तासासीमापौरुषेस्मृता ॥१९५॥ अंगुष्ठानामिकामध्येतेजसांतःप्रसारि
णी ॥वायव्यंतप्रसृमरास्त्रीसीमाभागरूपिणी ॥१९६॥ तयोःसंगेहिद्वापत्यं वियोगेतुवियोगिता ॥ पुंप्रजापौरुषाधिक्येस्त्र्याधिक्येप्रजाःस्मृताः
॥१९७॥ यद्यन्यतरसंपृक्तिस्तत्रैवव्यभिचारता ॥विच्छेदेतुपुनःकर्म बलस्यंतरंकृतंभवेत् ॥ १९८ ॥ मालिन्येरोगबाहुल्यंशैथिल्येत्वंगभंगता
वैवाहिकफलंचैवसीमारेखाद्वयोद्भवम् ॥१९९॥ स्त्रीरेखोत्तरहस्तस्य मध्येतिर्यक्प्रसारिणी ॥ पूर्णाहस्तांतमारभ्य तर्जनीमध्यमांतरे॥२००
यातिशीरेखान्विताचक्षी यद्वदायुष्यरेखिका ॥ पूर्णाशतायुषंदद्यादंतरेमध्यमायुषं ॥ २०१॥ कुरुतेपुरुषंकंचित्सच्छिद्राकालजांमृतिं ॥ संकट
कत्वेविपदोनीरं ध्रत्वेतुजीवनं ॥ २०२॥ करमूलंसमारभ्यस्त्र्यायुर्व्यासोर्ध्वमूर्छिता ॥ मध्यमानामिकासंधिंप्राप्तैकाऋजुरेखिका ॥२०३॥

धनजीवनदाज्ञेयात्तत्पूर्णत्वेमहाधनी ॥ आदिमध्यान्तभागेषुयत्रारब्धातदादिगा ॥ २०४ ॥ यत्रैवपर्यवस्येत तावत्धनमुदीरयेत् ॥ तिर्यक्चेत्कर्त्त-
रीरेखा धनभंगंविनिर्दिशेत् ॥२०५॥ कर्त्तरीत्रितयंप्रोक्तं महादारिद्र्यसंज्ञकं ॥ आयुर्योगेजीवनांतं स्त्रीयोगेतुसुखावधि ॥ २०६॥ संयुक्तरेखानुरूपं ध-
नप्राप्तिनिमित्तकं ॥ सर्वथाताद्दशीरेखानास्तियस्यकरान्तरे ॥२०७॥ वराटिकापिनद्धस्तेक्षणमात्रंनतिष्ठति ॥ परंलिखरसद्योगलक्षणैर्धनमाप्नु-
यात् ॥२०८॥ अभावेधनरेखाया धनीतिनहिकीर्त्यते ॥व्ययोऽपिसमहान्भूपादेषजीवननिर्णयः ॥ २०९॥ पुंस्त्र्यायुर्धनरेखास्तु चतस्रः प्रक-
टाःकरे ॥मध्येत्वंतरं लक्ष्मनराणांफलनिर्णये ॥२१०॥ गिरिर्गजोंकुशंशंखं कुण्डलंचन्द्रसूर्यकौ ॥ योनिरांदोलिकाचैवकंकणंचाविमस्तकं
॥२११॥ नेत्रंचस्वस्तिकंशूलंकिरीटंपानभाजनं ॥ कर्कटःपरशुश्चेतिरेखा अंगुष्ठमूलगाः ॥२१२॥ स्त्रीपुंधनांतरेरेखा अष्टकोणंत्रिशूलकं ॥ वे-
दिकामानुषशिरः कमलंधनुरेवच ॥२१३॥ सर्पश्चभेदिनीपुस्तंवीणाचैवत्रिकोणकं ॥ वर्तुलंचतटाकंचस्वस्तिकंचविनिर्दिशेत् ॥२१४॥ स्त्री-
सीमाधनमध्येतुतुलाचगजमस्तकं ॥ हलमश्वोमंदिरंचग्रामोडमरुकांकुशौ ॥२१५॥ कलशः पुस्तकंखड्गइत्यादिकमुदीरयेत् ॥ प्राग्दक्षिणां-
तरेत्वायुर्नारीवित्तांतरालगे ॥२१६॥ प्रदेशोगोपुरछत्रदेवालयसमाःस्मृताः ॥ धनुर्घण्टादिकारेखाविज्ञातव्यामनीषिभिः ॥२१७॥ आयु-
नर्यिन्तरेवित्तस्योदीच्यांरथसंज्ञका ॥ नौकांचकमलंबाणंगदामपिचकीर्त्तयेत् ॥२१८॥ आयुरेखोपरिशान्तुकिरीटंध्वजमेवच ॥ विद्यांसिं-
हासनंवल्लींचित्ररेखांविनिर्दिशेत् ॥२१९॥ कुलिशाद्यास्तथारेखानिर्दिष्टाहस्तमध्यगाः ॥ रेखाअप्यनुरेखाश्चउपरेखाश्चसूक्ष्मगाः ॥२२०॥
प्राणिकर्मानुसारेणदेहजाःफलसूचकाः ॥ विस्पष्टं परिदृश्यंतेकर्मकृद्धस्तमध्यगाः ॥ २२१॥ स्वरूपानुगुणंतासांफलंवाच्यंमनीषिणा ॥ वि-
रुद्धफलयोर्योगेप्राबल्यंपरिकीर्त्तयेत् ॥२२२॥ तदैकफलयोर्योगेप्रबलस्यैवसंभवः ॥ गजाश्वादोलिकाछत्रचामरध्वजवाहनं ॥२२३॥ सिं-
हासनादिकंज्ञेयंरेखातोराजलक्षणं ॥ चन्द्रार्कगोपुरादीनिदेवालयसुखंतथा ॥ २२४॥ दैविकंलक्षणंज्ञेयमायुधंशूरलक्षणं ॥ जलजंत्वादि-
केभाग्यंवाणिज्योपकृतौधनं ॥ २२५॥ जलोपकरणेसौख्यमचिमस्तेतथामिषं ॥ हलादिकेकृषिर्ज्ञेयागिरिग्रामादिकेप्रभुः ॥ २२६॥ किरीटं
पुस्तकंवल्लीचित्रध्वजसमुद्भवाः ॥ पाण्डित्यलक्षणेरेखामस्तकंचौर्यलक्षणं ॥ २२७॥ धनकृत्कलशःसर्पेवीणागायनलक्षणा ॥जी

वहिंसाकरःपाशः पानकृत्पानभाजनं ॥ २२८ ॥ विषमंचचतुष्कोणशिल्पसेवकलक्षणं ॥ अश्वकोणतटाकादिकूपखातादिलक्षणं ॥२२९॥
यवादिकेतुमिष्टान्नंचक्राद्यंप्रभुलक्षणं ॥ योन्यादिकेतुदौर्भाग्यंयूपाद्येयज्ञशीलता ॥२३०॥ त्रिमूलादौभिक्षुकत्वं फलमुच्चावचंवदेत् ॥
स्त्रीणांदक्षिणहस्तस्थापुंसांवामकरस्थिता ॥२३१॥ रेखापुंस्त्रीफलेकुर्यात् फलस्यपरिवर्तनं ॥ एतदाद्यास्तथारेखाऊर्ध्वाद्यन्यांगसंस्थिताः ॥२३२
॥ तथापादतलेसर्वंफलंवाच्यंपृथक्पृथक् ॥ रेखासमीकृतोशास्त्रेवैकृतेविकृतंफलं ॥२३३॥ माकिन्येरवत्प्रकाशःस्यादेतत्सामुद्रिकंस्मृतं ॥तन्न
देवांशसंभूतंदेवलक्षणलक्षितं ॥२३४॥ राजलक्षणयुक्तंचमहापुरुषमीरयेत् ॥ नारीचतादृशीज्ञेयादेशकालानुमानतः ॥२३५॥ पूर्वमायुः
परीक्षेतपश्चाल्लक्षणमीरयेत् ॥ आयुर्हीननराणांतुलक्षणंकिंप्रयोजनं ॥२३६॥ नवरंध्राणिहस्तांघ्रिपृष्ठनाभिशिरोवपुः ॥ कंठवक्षोदरोर्वा
दिसर्वंरेखंपरीक्षयेत् ॥२३७॥ स्वरंदृष्टिंचशीलंचविज्ञायफलमीरयेत् ॥ रेखैवब्रह्मेश्वरीमुद्राशरीरंहिसमुद्रकं ॥२३८॥ एतत्सामुद्रिकंशा
स्त्रंसंग्रहेणसमीरितं ॥ अथप्रह्लादप्रणीतअंगसामुद्रिकं ॥श्रीविष्णुभक्तःप्रह्लादःप्राहसामुद्रिकाह्वयं ॥शास्त्रंतज्ज्ञानमात्रेणजा
नातिनरयोग्यतां ॥२३९॥ सप्तकिष्कूच्छ्रितंसांगंशरीरंपरिणामियत् ॥वर्धतेक्षीयतेतस्यरेखाःस्युर्भोगसूचकाः ॥२४०॥ आकारसौष्ठ
वंचैवतथांगपरिमाणकम् ॥ शब्दादिकान्गुणांश्चापिरेखाःसर्वांगसंभवाः ॥२४१॥ स्त्रीपुंलक्षणमित्येवंपंचभिःकरणैःपृथक् ॥ त्रैकालि
कफलंज्ञेयंसप्रमाणानुमानतः ॥ २४२॥ अंगसामुद्रिकंचैवहस्तसामुद्रिकंतथा ॥ स्त्रीसामुद्रिकमित्येवत्रिधाशास्त्रंप्रचक्षते ॥ २४३॥
नैसर्गिकंकालजंचचिन्हंनैमित्तिकंतथा ॥ कालदेशानुमानेनज्ञात्वाफलमुदीरयेत् ॥ २४४ ॥ लिपिःपैतामहीज्ञेयारेखाअंगांगसंभवा ॥पद्य
शुभाशुभंनृणांप्रतिबिंबवदीक्ष्यते ॥२४५॥ पादादिमूर्धपर्यन्तंसूत्रेणपरिमापयेत् ॥ सप्तकिष्कूच्छ्रितंशास्त्रंव्यामांतरमथापिवा ॥२४६॥ स्तन
त्वंनाभिमध्यत्वेऊर्ध्वाधिक्येतुशौर्यभाक् ॥ आधिक्येत्वधरांगस्यजंघालोवेगवान्भवेत् ॥२४७॥ नाभेर्हृदयपर्यन्तंहृदयान्नासिकावधः ॥
स्तनांतरंसमंतस्यद्विगुणंमूर्धवेष्टनं ॥२४८॥ कण्ठपृष्ठात्स्तनाग्रांतंललाटंतिर्यगुच्यते ॥ ललाटोर्ध्वपरिमाणंनासादिचुबुकांतरं ॥२४९॥ नि
त्रकर्णांतरंसूक्ष्मंभ्रुवोरप्यन्तरंमहत् ॥ तर्जनीतुलितानासाकर्णौमध्यमयासमौ ॥२५०॥ मध्यंशिरःसमंयस्यपादोहस्तमितस्तथा ॥ लिंगंह

शांगुलायामं सपुमान्पुरुषोत्तमः ॥२५१॥ बुद्धिमान्भाग्यवांश्चैवशौर्यधैर्यपराक्रमी ॥ ललाटरेखाबाहुल्ये दीर्घायुर्दृढगात्रवान् ॥२५२॥ लिंग
न्हस्वे महाभोगी लिंगाधिक्ये दरिद्रता ॥स्थौल्यं बलकरं सत्यं मुष्कप्राबल्यतो बलं ॥२५३॥ प्राबल्ये धमनीनांच जागरूको भवेन्नरः ॥ अ
स्थिस्थौल्ये बलाधिक्यं सूक्ष्मदंतस्तु भोजनः ॥२५४॥ शातजिह्वस्तु वाग्मी स्याद्वेतत्सामान्यलक्षणं ॥ विशेषलक्षणैर्ज्ञेयं तत्तत्सामुद्रिकं शुभं ॥
२५५॥ पंचदीर्घं चतुर्न्हस्वं पंचसूक्ष्मं षडुन्नतं ॥ ससरक्तं त्रिगंभीरं त्रिविस्तीर्णं प्रशस्यते ॥२५६॥ आयुरारोग्यसौभाग्यराज्यवंशसमृद्धिकृत् ॥स्त
नयोरंतरंचैव कराक्षिहनुनासिकं ॥२५७॥ दीर्घं यस्य स लक्ष्मीवान् पंचदीर्घ इतिस्मृतः ॥ ग्रीवा च जघनं पृष्ठमूलं नंघे तथैव च ॥२५८॥ न्हस्वानि यस्य
चत्वारि पूजामाप्नोति मानवः ॥ सूक्ष्माण्यंगुलिपर्वाणि केशादंतनखत्वचः ॥२५९॥ दीर्घायुषो नरा येषां पंचसूक्ष्मत्वलक्षणाः ॥ कक्षः कुक्षिश्च वक्षश्च
घ्राणस्कंधललाटकं ॥२६०॥ सर्वभूतेषु निर्दिष्टं तद्बुधैर्षडुन्नतं ॥ यशस्विनो महावीर्या धनिनश्च भवंति ते ॥ २६१॥ पाणिपादतले रक्ते नेत्रान्ते च न
खास्तथा ॥ तालुजिन्हाधरोष्ठानि ससरक्तं श्रियःप्रदं ॥२६२॥ स्वरः सत्त्वं च नाभिश्च त्रिगंभीरं गरुत्वकृत् ॥ उरः शिरो ललाटं च त्रिविस्तीर्णं महत्व
कृत् ॥२६३॥ महच्छिरो रोमहीनं विशालं च ललाटकं ॥ दीर्घकर्णं तुंगनासं स्थूलपण्डितलक्षणं ॥२६४॥ मृदुपाणिपदश्चैव स्थिरकार्यकरस्तथा ॥
धृतिमान्जागरूकश्च धनवान्भवति ध्रुवं ॥ २६५॥ दीर्घांगुलिर्गुल्फसमः स्वदेहीनपदस्तथा ॥ आरक्तनिर्मलनखो धनवान्राजपूजितः ॥ २६६॥
आरक्तमृदुनीरंध्रऋज्वंगुलकरांघ्रिकः ॥ अस्विन्नपाणिपादश्च भाग्यवान्भवति ध्रुवं ॥ २६७॥ दीर्घपाच्छूर्पकर्णश्चसच्छिद्रांगुलिकस्तथा ॥ दुर्बलः
शुष्कजघनो दुःखभाग्भवति ध्रुवं ॥२६८॥ कूर्मपृष्ठप्रपदवान् किंचिदुष्णांघ्रिरेव च ॥ सद्बुद्धिः सुंदरो यश्च स भवेज्जनवंदितः ॥ २६९॥ पादांगु
ष्ठाद्द्वितीयस्तु दीर्घो यद्यंगुलिर्भवेत् ॥ बहुस्त्रीरमणो भूयान्मृदुप्रपदवान्सुखी ॥२७०॥ हारिद्रनखरो भूयाद्दुराचाररतो नरः ॥ रोगी तु नीलन
खरो रिक्तश्च शिथिलो नखैः ॥२७१॥ दीर्घा कनिष्ठिका यस्य नखरो रुणसन्निभः ॥ धनवान्राजमान्यश्च भूपालो भवति ध्रुवं ॥२७२॥ तूणीरसन्नि
भा जंघा बाहुः करिकरोपमः ॥ नेत्रे च पद्मपत्राभे स पुमान्राजलक्षणः ॥२७३॥ सशब्दमूत्रोत्सर्गश्च मध्यसौरभशुक्रवान् ॥ धनवान्पुत्रवान्स्म
याद्रतो दौर्गन्ध्यतोऽन्यथा ॥२७४॥ समांडत्वे सुखं चायुर्न्हस्वांडत्वे प्रभुर्भवेत् ॥ वक्रांडत्वे सेवकश्च चर्मांडात्तु नपुंसकः ॥ २७५॥ स्याद्वामा

वर्तनाभिस्तुदरिद्रोदक्षिणे धनी ॥ वलिमध्येतुनाभिश्चेन्निर्धनःपापकर्मभाक् ॥ २७६॥ उदरेवलिरेखाचेन्च्छस्त्रघातोभविष्यति ॥ वलिद्वये
स्त्रीविजयी त्रितयेबहुभागभाक् ॥२७७॥ शूरश्चतुष्टयेभूयात् फलमेवंपृथक्पृथक् ॥ पार्श्वत्वस्थि मयेरिक्ते भोगवान्भवति ध्रुवं ॥२७८॥ अ
दर्शनेतुनाडीनांसुखभोजनमादिशेत् ॥ उत्तुंगच्चूचुकोभूयादनपत्यश्चदुःखभाक् ॥२७९॥ मणिबंधत्रिरेखस्तुमणिभूषणभाग्भवेत् ॥ सा
धारणोद्विरेखःस्यादेकरेखस्तुभिक्षुकः ॥२८०॥ द्वात्रिंशद्दन्तवान्भोगी त्रिंशन्न्यूनेतुनिर्धनः ॥ कपटीरोमहीनश्चबहुरोमातुबंधभाक् ॥२
८१॥ कुबेराक्षसमाक्षश्चनिष्ठुरोनिर्धनस्तथा ॥ बिडालतुल्यनेत्रस्तु पश्येन्निध्यंजनादिकं ॥२८२॥ यस्यभालतलेरेखाःपंचपूर्णायुरुच्यते
॥विंशत्यब्दास्तथैककंसमरेखो धनीभवेत् ॥२८३॥ पृष्ठावर्तेतुपंचाशत्सार्वावर्तेतुसप्ततिः ॥ ऊर्ध्वावर्त्तेतथाल्पायुः केशानांशिरसि ध्रुवं
॥२८४॥ विंशत्यब्दोत्तरावर्ते क्षिप्रमेवमरिष्यति ॥त्रिंशदब्दोत्तरावर्ते चिरजीवी भवेन्नरः ॥२८५॥ लोमकूपेतुलोमैक्येभूपालोभवतिध्रु
वं ॥धनीलोमद्वयेभूरिलोमस्त्वथचनिर्धनः ॥२८६॥ क्वचिद्व्रतिः क्वचिन्निद्रोभुंक्तेल्पंक्षिप्रमेवयः ॥ चिरस्थायीदीर्घलस्यो भाग्यवान्भव
तिध्रुवं ॥२८७॥ शायालुरपिसंध्यासुहिंसाकर्मरतस्तथा ॥ निर्दयोगूढपापश्चदुःखभाग्भवतिध्रुवं ॥२८८॥ भ्रूनासाजानुहनुदोदीर्घत्वेकं
ठजंघयोः ॥ रसनायामेहनस्यन्हस्वत्वेभाग्यवान्भवेत् ॥२८९॥ चुबुकेयस्यरोमाणिनवक्षसिनगंडयोः ॥ कुटिलंतंविजानीयात् समर्थंचिरव
लंनरं ॥२९०॥ निरुक्तलक्षणानांतु विरोधेत्वन्यथाफलं ॥ सत्यधर्मरतश्चैवशुचिःशोभनवान्सुखी ॥२९१॥ पादचक्रेतुयानावान् भूशायी
पार्श्वचक्रभाक् ॥ पृष्ठचक्रेभारवाही कुक्षिचक्रेसुभोजनः ॥२९२॥ मृदुलेपादतलयोर्भवेद्वाहनसौख्यभाक् ॥ देहस्यमार्दवेतद्वच्छैय्यासौ
ख्यंलभेन्नरः ॥२९३॥ कर्णरोमातुदीर्घायुर्नाभिरोमाबहुप्रजः ॥ विकलांगोधिकांगोवादुःशीललक्षणवर्जितः ॥२९४॥ यस्यहस्ततलंसम्य
क्कठिनंसहिकर्मकृत् ॥ उपदंतश्चदुष्टात्माबंधुनाशेनारिवयति ॥२९५॥ प्रकृतिस्थःसमसुख॰ ॥विपरीतेविपर्ययः ॥ वर्चस्वीदेवबलवान्क्रौ
र्येत्वासुरसंपदः ॥२९६॥ अंगसामुद्रिकंज्ञेयमित्येतच्छास्त्रनिर्णयात् ॥ अन्यसामुद्रिकोक्तानांफलानांतुसमुच्चयः ॥२९७॥ ॥अथ
प्रल्हादकृतस्त्रीसामुद्रिकलक्षणं ॥ अथातःसम्प्रवक्ष्यामिस्त्रीसामुद्रिकलक्षणं ॥ सुरूपात्वसुशीलाचदुर्लभासत्कुलोद्भवा ॥२९८॥

स्फुरच्चन्द्रमुखीनारी पद्मपत्रायतेक्षणा ॥ अर्धेन्दुनिटिला वक्रभ्रूलता कुटिलालका ॥२९९॥ चांपेयनासिका कुंदरदना कोमलांगका ॥ बिं
बोष्ठीकंबुकण्ठी च कृशांगी सूक्ष्ममध्यमा ॥३००॥ शातोदरी पृथुश्रोणी रम्भोरू भाग्यशालिनी ॥ पद्मसदृशपाण्यंघ्रिः सुशीला सुगुणान्विता ॥
३०१॥ सुगंधा सत्कुलान्मन्त्रा लज्जाविनयशालिनी ॥ दयालुर्धर्मनिरता पतिभृत्यपरायणा ॥३०२॥ यत्रस्यादीदृशोनारी तत्र लक्ष्मीः प्रसीदति
आनंदयति सा लोकं पितृभर्तृकुलद्वयं ॥३०३॥ कनिष्ठिकांगुलिः पादे गच्छंत्या न स्पृशेद्ध्रुवं ॥ निम्नं पादतलं जारा निःशब्दं भवति ध्रुवं ॥३०
४॥ अथवा विधवा भूयात्सुखं तस्या न विद्यते ॥ पादताडनतो भूमिं चालयंत्यपि खिद्यति ॥ ३०५॥ सरोमोत्तुंगजंघा च फाली त्ताना तिमूर्ध
जा ॥ भ्रूजोरु केरायुक्ता च मस्तावर्ता पतिं हरेत् ॥ ३०६॥ अत्यंतनीलकेशा च शुष्कश्रोणी च दासतां ॥ विकटांगुलिराप्नोति वैधव्यं चा
प्यपुत्रतां ॥३०७॥ लंबालका महामस्ता पृथुमध्या महोदरी ॥ वामावर्ता च वैधव्यं दारिद्र्यं दुःखमाप्नुयात् ॥३०८॥ कट्यावर्ता सेवकस्त्री कं
ठावर्तातु निष्प्रजा ॥ फालावर्ता च विधवा जारिणी कलहप्रिया ॥३०९॥ ओष्ठच्चूबुकगंडेषु कर्णयोर्भुजयोरपि ॥ लोमानि न प्रकाशंते सा ना
री भोगभोगिनी ॥३१०॥ नद्यावर्तभिना भिश्चतनुरोमा सुरूपिणी ॥ सुदती सुमुखी भूयाद्राजपत्न्यतिकोमला ॥३११॥ समस्तनी च सौ
भाग्यं लभेच्छातोदरी सुखं ॥ स्थूलजंघा न्हस्वफाला पुत्रपौत्रसुखं लभेत् ॥३१२॥ तुंगकण्ठी तु निर्लज्जा न्हस्वकण्ठी तु निर्धना ॥ कंबुकं
ठत्रिरेखाढ्या सुशीला कुलवर्धिनी ॥३१३॥ कण्ठे वा पार्श्वयोर्वापि तिलकाकृति चिह्नका ॥ प्रथमप्रसवे पुत्रं प्राप्नुयान्नात्र संशयः ॥३१४॥
दरस्मेरवती नारी तरलाक्षी च जारिणी ॥ प्रगल्भभाषिणी चैव लज्जानटनशालिनी ॥३१५॥ स्थूलोष्ठी स्थूलदंता च वृत्ताक्षी वक्रनासिका ॥ कक्ष
स्य नीलसिध्मा च भर्तुर्गृह्यविनाशिनी ॥३१६॥ पीतजिह्वा च वाचाटा खरी गंधा च निंदिता ॥ सर्वथैव परित्याज्या पांसुला मा भवेत् ध्रुवं ॥३१७॥ उ
ष्णस्पर्शवती नारी रोदनं कुरुते मुहुः ॥ अक्षमा कलहोद्युक्ता ज्येष्ठा लक्ष्मी सखी भवेत् ॥३१८॥ कुमारी रसनाकांशा स्वेदगंधवती तथा ॥ विलो
मकेशी वक्राक्षी रिक्ता बहुसुताऽधवा ॥३१९॥ कुंदकुड्मलदंता भान्हस्वा नीलालकालिका ॥ निम्ननाभिश्च सुमुखी भर्तुः सौभाग्यदायिनी
॥३२०॥ वामपादावस्थितिस्तु मरिष्यति सुमंगली ॥ न्हस्वकल्पा पसव्यांघ्रिर्वैधव्यं लभते ध्रुवं ॥३२१॥ मार्जारीस्वरसंयुक्ता निर्लज्जा रोषशालि

नी ॥ मृतप्रजाभवेन्नारी मुहुश्चौर्यं करोति सा ॥ ३२२॥ मार्जारनेत्री कुमुखी नासान्तर्लोमसंकुला ॥ मुग्धा च गड्डुयुक्तांगी अन्यैः कोपकृतिं वरेत्
॥३२३॥ दुःशीला कर्कशा चण्डी नित्यं कलहकारिणी ॥ अतिभुक्ते च या नारी सप्रजामपि संत्यजेत् ॥३२४॥ भीरुःस्वप्नोन्मादवती रक्तांगण
समुद्भवा ॥ शुष्काक्षिकुक्षिकंठा च प्रस्विन्नचरणा तथा ॥३२५॥ दारिद्र्यं च दुराचारं वंध्यात्वं बहुमैथुनं ॥ लभते च स्तनस्थौल्ये वह्वाचारं च
संततिं ॥३२६॥ प्रसन्नवक्त्रा मृगशावाक्षी देवन्यस्तभरा तथा ॥ कूर्मपृष्ठप्रपदका तीर्थयात्राफलं लभेत् ॥३२७॥ अभुक्तमूलसंभूता वामो वेत
स्तिलद्वयी ॥ लभते नीचसंसर्गं गृहं त्यक्त्वा बहिर्व्रजेत् ॥३२८॥ सूक्ष्मबिंबारुणोष्ठी च निजकांतानुरागिणी ॥ समांगुलिर्ह्रस्वकरा गुरुशुश्रू
षणे रता ॥३२९॥ दीर्घपृष्ठा प्नुयाद्धानिं वैशाल्ये बहुसोदरान् ॥ लभते तनुमध्या च सुंदरी बहुभूषणं ॥३३०॥ मृदुकर्णी रत्नभूषां सौवर्णकठिन
श्रुतिः ॥ कं ५० । शुष्कहस्ता च व्यासोरुर्हीरभूषणं ॥३३१॥ तस्या एव कुरूपत्वे नैल्यं चा वामचक्षुषः ॥ ह्रस्वत्वे प्राप्नुयाद्वस्त्रा कल्पं रत्नसंयुतं॥
३३२॥ ह्रस्वत्वे दक्षिणांगस्य भविता कीर्तिशालिनी ॥ वामांगस्य तु दुष्कीर्तिं प्राप्नुयात्सुश्चली भवेत् ॥३३३॥ स्वांगुलिश्चुलकोपेता दीर्घ
जिह्वा लभेत्सभून् ॥ सव्यनासा तिलवती धनधान्यादिकं लभेत् ॥३३४॥ वामांघ्रिमध्यमांगुल्या मधौ रेखा द्वयं यदि ॥ चाइनं लभते नारी गृहं
न रुचिरं तथा ॥३३५॥ पद्मगंधवती नारी भगवद्भक्तिमाप्नुयात् ॥ दुर्लक्षणवती दुष्टाशी भवेच्च सुलक्षणा ॥३३६॥ शुष्का गुरुस्तथा बाहू सरोमौ
चैत्संततिं हरेत् ॥ शुष्कयोनिश्च विरलद्विजा त्याज्या मनीषिभिः ॥ ३३७॥ कन्यां प्रथमतो द्रष्टुं पुरुषो यदि गच्छति ॥ तदा भं क्ते पदि रुजं रुदती भर्तृ
नाशनं ॥३३८॥ निद्रालुर्दीर्घनिद्रां च गच्छंत्यपि च जारिणी ॥ सर्वनिष्कासये द्गेहात्करोति कलहं यदि ॥३३९॥ अपस्मृतिर्दुःखयुक्ता वस्त्रहीना वि
योगिनी ॥ अंधकारे महामूढा सालंकारा च मंगलं ॥ ३४०॥ प्रकाशेऽपि तु सत्कीर्तिं भोजने सुप्रजां लभेत् ॥ पुष्पिणी लभते मृत्युं नारिणी वा विरा
गिणी ॥३४१॥ आदिवगणनक्षत्रशुभवारसमुद्भवा ॥ ह्रस्वजिह्वा समायुक्ता विद्यां वृद्धिमवाप्नुयात् ॥३४२॥ इति सामान्यतः प्रोक्तं स्त्रीसा
मुद्रिकलक्षणं ॥ विशेषलक्षणैस्तत्तन्मेलयेच्च यथाबलं ॥३४३॥ इति स्त्रीसामुद्रिकफललक्षणं ॥ अथ हरगौरीसामुद्रिकलक्षणं ॥ अ
थातः सम्प्रवक्ष्यामि हस्तरेखाविचारकं ॥ दक्षिणः पौरुषो ज्ञेयो वामो वामकरः शुभः ॥३४४॥ यस्य मीनसमा रेखा कर्मसिद्धिश्च जायते॥

धनाढ्यःसतुविज्ञेयो बहुपुत्रोनसंशय: ॥३४५॥ तुलायामस्तथारज्जुःकरमध्येचदृश्यते ॥ तस्यवाणिज्यसिद्धिःस्यात्पुरुषस्यनसंशयः ॥
३४६॥पद्मचापादिकंखड्गमष्टकोणादिदृश्यते ॥ स्त्रियाश्चपुरुषस्यापि धनवान्ससुखीनरः ॥३४७॥ शंखचक्रध्वजाकारोमाषाकारश्च
दृश्यते ॥ सर्वविद्याप्रवीणश्च बुद्धिमान्सभवेत्ध्रुवं ॥३४८॥ त्रिशूलंकरमध्येतुतेनराजा भविष्यति ॥ यज्ञेधर्मेच दानेचद्विजदेवप्रपूजने ॥
३४९॥ निरतःपुत्रवांश्चैवप्रतिष्ठाताशिवस्यच ॥ शक्तितोमरबाणंचकरमध्येतुदृश्यते ॥३५०॥ रथचक्रध्वजाकारःसचराज्यंलभेन्नरः॥
अंकुशंकुण्डलंचक्रंयस्यपाणितलेभवेत् ॥३५१॥ तस्यराज्यंमहच्छ्रेष्ठंसामुद्रवचनंतथा ॥ गिरिकंकणयोनीनांनरमुण्डकरीरयोः ॥३५
२॥ करिणांयस्यचिन्हानिराजमंत्रीभवेन्नरः ॥ सूर्यचन्द्रलतानेत्रैरष्टकोणत्रिकोणकैः ॥ गजाश्वमन्दिरैर्भूयात्धनीचापीसुखीनरः ॥३५
३॥ अनामिकापर्वमूलेकनिष्ठादिक्रमेणतु ॥ आयुर्दशैववर्षाणिसामुद्रवचनंतथा ॥३५४॥ तर्जनीमूलपर्यन्तंकनिष्ठादिक्रमेणतत् ॥ आयुः
श्चविंशतेःषड्भिःरक्तरेखाचदृश्यते ॥३५५॥ यदारेखान्तरैर्भिन्नास्वयंभिन्नाचदृश्यते ॥ तदासम्यग्विजानीयात्गण्डकालंविशेषतः ॥३५
६॥ सानभ्रान्तेदधोभागेकनिष्ठादिक्रमेणतु ॥ वृक्षादुन्नतदेशाद्वा वाहनात्पतनंभवेत् ॥३५७॥ अंगुष्ठेचोर्ध्वरेखातुवर्ततेनृपतिःशुभा॥
सेनापतिर्धनेशश्चमध्यमायुर्भवेन्नरः ॥३५८॥ तर्जनीमूलपर्यन्तमूर्ध्वरेखाचदृश्यते ॥ राजदूतोभवेत्तस्यधर्मनाशश्चजायते ॥३५९॥ मध्य
मामूलपर्यन्तमूर्ध्वरेखाचदृश्यते ॥ पुत्रपौत्रादिसम्पन्नोधनवान्ससुखीनरः ॥ ३६०॥ अनामिकोर्ध्वरेखायांव्यवसायोधनागमः ॥ सुखदुः
खेनजीवेतपुत्रपौत्रगृहादिषु ॥३६१॥ येषांपाणावूर्ध्वरेखाकनिष्ठामूलसंस्थिता ॥ पंचसप्ततिवर्षाणिह्यायुषोबलमुच्यते ॥ ३६२॥ मध्यमामू
लपर्यन्तमायूरेखानदृश्यते ॥चतुर्दशाचतुर्विंशादायुर्बलविनाशनं ॥३६३॥ आयुर्बलंभवेद्रेखानामिकामूलसंस्थिता ॥ त्रिदशंत्रिषष्टिभ्यः
आयुर्बलविनाशनं॥ ३६४ ॥अंगुलीनांपृथक्रेखागण्यतेत्रितयंपृथक् ॥रेखाद्वादशकंसौख्यधनधान्यप्रदायकं ॥३६५॥ अंगुलीनांपृ
थक्रेखाकलनेचेत्त्रयोदश ॥ महादुःखंमहाक्लेशःसामुद्रवचनंतथा ॥३६६॥ अंगुलीनांपृथक्रेखागणनेचेच्चतुर्दश ॥ महासुखीमहाभो
गीसामुद्रवचनंतथा ॥३६७॥रेखापंचदशेचोरःषोडशेद्यूतवंचकः ॥ पापीसप्तदशेज्ञेयो धर्मात्माष्टादशेभवेत् ॥३६८॥ ऊनविंशेभवे-

न्मान्योगुणज्ञोलोकपूजित: ॥ तपस्वीविंशताज्ञेयोमहात्माचैकविंशता ॥ ३६९॥ अंगुलीनांपर्वमध्येसांगुष्ठंचाग्रपर्वच ॥ परित्यज्यांगु
लीपर्वरेखागणनतोयत: ॥३७०॥ चतुरंगुलिकापर्वाण्यष्टरेखायुतानिचेत् ॥ शुभयोगयुतोभूयात्धनवांश्चभविष्यति ॥३७१॥ तत्रैक·
विंशति:स्याच्चतु:खवांश्चभविष्याति ॥ त्रयस्त्रिंशाच्चषद्त्रिंशत्धनलक्ष्मीसहायवान् ॥३७२॥ एकचक्र:सदाभोगीद्विचक्रोराजपूजित:
॥ धनाढ्यस्तुत्रिभिश्चक्रैश्चतुश्चक्रोदरिद्रक: ॥३७३॥ विलासीपंचचक्रेणषट्चक्रेणसकामुक: ॥ सप्तचक्रेणशुभवान्अष्टचक्रेणरोगवा
न् ॥३७४॥ भूपालोनवचक्रेणदशचक्रेणयोगवान् ॥ एवंचक्रफलंदृश्यंसामुद्रवचनंतथा ॥३७५॥ एकशंख:सुखीभोगीद्विशंखेन
दरिद्रता ॥ चतु:शंखेनगुणवान्त्रिशंखेनागुणीभवेत् ॥३७६॥ निर्धन:पंचशंख:स्याच्छद्शंखेनप्रतापवान् ॥ सप्तादिदशशंखांतं
राजचिन्हानिदृश्यते ॥३७७॥ एकशीपेनगुणवान्वक्ताभूयाद्विशीपत: ॥ धनाढ्यस्तुत्रिशीपेनचतु:शीपेनसद्गुणी ॥ ३७८॥ चतु:शी
पादिदशकशीपांतेवृद्धिमान्भवेत् ॥ रेखैकामणिबंधेतुराजभोगीभवेन्नर: ॥३७९॥ यदिद्वेसद्गुणीवक्ताधनवांश्चभविष्यति ॥३८०॥
॥ इतिहरगौरीसामुद्रिकलक्षणं ॥ अथगर्गमुनिकृतसामुद्रिकलक्षणं ॥अथात:सम्प्रवक्ष्यामिगर्गसामुद्रसंग्रहं ॥ स्त्रीणांचपु
रुषाणांच फलसाम्पायकल्पते ॥३८१॥अंगुष्ठमूलगारेखा: संतानंसूचयंतिता: ॥ सांकुराश्चतथानार्य:पुरुषा:सजटा:स्मृता: ॥३८२
॥ गर्भस्त्राचोतिसूक्ष्मत्वेविच्छेदेबालघातनं ॥ दीर्घादीर्घायुषोज्ञेयाअल्पाअल्पायुष:स्मृता: ॥३८३॥ तदभावेप्रजाभावइतिसंता·
नलक्षणं ॥दंपत्यन्यतराभावेतदभावोन्यथान्यथा ॥३८४॥ कनिष्ठांगुलिमूलेतुरेखा: करतलांतगा: ॥ सहोदरंसूचयंतिपुत्रव
त्त्रनिर्णय: ॥ ३८५॥ मध्येतुधनरेखायादक्षिणोत्तरपार्श्वके॥ मातरंपितरंविद्याद्गुरेखा:समीपगा: ॥३८६॥ संसक्ताआत्मरेखायामात्मबांधवसूचका:
सूक्ष्मत्वेचरेखानांफलंसंतानवन्मतं ॥ ३८७॥ पादादिकटिपर्यन्तंतत:कण्ठान्तमेवच ॥ तत:केशान्तमृक्षाणांविज्ञेयंनवकत्रयं ॥ ३८८ ॥ वर्त्तुलंचतुरस्त्रं
चत्रिकोणंबाणमेवच ॥ दीर्घंयच्चतुरस्त्रान्यंपंचकोणंधनुस्तथा ॥ ३८९॥ ध्वजश्चेतिग्रहास्तारायस्मिन्नंगेप्रदृश्यते ॥ तद्राशौतद्गृहेजन्मतद्दशायांशुत
द्भवेत् ॥ ३९०॥ ग्रहनक्षत्रविज्ञानात्सर्वंज्यौतिषकंवदेत् ॥ आयुर्धनविवाहादिरेखाभि:फलयोजनं ॥ ३९१ ॥ अंगांगुरुशिरांनिघ्नंतद्द्वादशभिस्त

या॥ कर्मं विज्ञायतेतेन सर्वं फलमुदीरयेत् ॥३९२॥ अथगरुडपुराणोक्तसामुद्रिकलक्षणं ॥ हरिरुवाच ॥नरस्त्रीलक्षणंवक्ष्ये संक्षेपा
च्छृणुशंकर ॥ अस्वेदिनौमृदुतलौकमलोदरसन्निभौ ॥ ३९३॥ श्लिष्टांगुलीताम्रनखौसुगुल्फौशिरयोज्झितौ ॥ कूर्मोन्नतौचचरणौस्यातांनृपव
रस्यहि ॥ ३९४ ॥ विरूक्षपाण्डरनखौवक्रौचैवशिरान्वितौ ॥ शूर्पाकारौचचरणौसंशुष्कौविरलांगुली ॥ ३९५॥ दुःखदारिद्र्यदौस्यातांनात्रका
र्यविचारणा ॥अल्परोमयुताश्रेष्ठाजंघाहस्तिकरोपमा ॥ ३९६॥ रोमैकैकंकूपकेस्याद्भूपानांतुमहात्मनां ॥ द्वेद्वेरोमेपण्डितानांश्रोत्रियाणांतथैव
च ॥३९७॥ रोमत्रयंदरिद्राणांरोगीनिर्मांसजानुकः ॥ अल्पलिंगेचधनवान्स्यादपुत्रादिवर्जितः ॥३९८॥ स्थूललिंगोदरिद्रःस्याद्दुःखयेकवृष
णीभवेत् ॥ विषमेस्त्रीचंचलोवैनृपःस्याद्वृषणेसमे ॥ ३९९॥ प्रलम्बवृषणोल्पायुर्निर्द्रव्यःकुमणिर्भवेत् ॥ पाण्डरैर्मलिनैश्चैवमणिभिश्चसुखीन
रः॥ ४००॥ निःस्वाःसशब्दमूत्राःस्युर्नृपानिःशब्दधारया ॥ भोगाढ्याःसमजठरानिःस्वाःस्युर्घटसन्निभाः ॥ ४०१॥ सर्पोदरादरिद्राःस्यूरेखाभि
श्चायुरुच्यते ॥ ललाटेयस्यदृश्यन्तेतिस्रोरेखाःसमाहिताः ॥ ४०२॥ सुखीपुत्रसमायुक्तःसषष्टिंजीवतेनरः ॥ चत्वारिंशच्चवर्षाणिद्विरेखादर्शना
न्नरः ॥४०३॥ विंशात्यब्दमेकरेखाआकर्णान्तागतायुषः ॥ आकर्णान्तरितारेखास्तिस्रश्चस्युःशतायुषः ॥४०४ ॥ सप्तत्यायुर्द्विरेखातुषष्ठ्यायुस्ति
सृभिर्भवेत् ॥व्यक्ताव्यक्ताभिरेखाभिर्विंशत्यायुर्भवेन्नरः ॥४०५॥ चत्वारिंशच्चवर्षाणिहीनरेखस्तुजीवति ॥ भिन्नाभिश्चैवरेखाभिरपमृत्युर्नरस्य
हि ॥४०६॥ त्रिशूलंपट्टिशंवापिललाटेयस्यदृश्यते ॥ धनपुत्रसमायुक्तःसजीवेच्छरदःशतम् ॥४०७॥ प्रथमाज्ञानरेखातुअंगुष्ठादनुवर्तते ॥म
ध्यमामूलगारेखाआयूरेखाअतःपरं ॥४०८॥ कनिष्ठिकांसमाश्रित्यआयूरेखासमाविशेत् ॥ अच्छिन्नावाविभक्तावासजीवेच्छरदःशतम् ॥४०९॥यस्
स्यपाणितलेरेखाआयुस्तस्यप्रकाशयेत् ॥ शतंवर्षाणिजीवेच्चभोगीरुद्रनसंशयः ॥ ४१०॥ कनिष्ठिकांसमाश्रित्यमध्यमायामुपागता ॥षष्टिवर्षायु
षंकुर्यादायूरेखातुमानवम् ॥४११॥ यस्यास्तुकुंचिताःकेशामुखञ्चपरिमण्डलम् ॥ नाभिश्चदक्षिणावर्तःसाकन्याकुलवर्धिनी ॥४१२॥याचकां
चनवर्णाभारक्तहस्तसरोरुहा ॥ सहस्राणांतुनारीणांभवेत्सापिपतिव्रता ॥ ४१३॥ वक्रकेशाचयाकन्यामण्डलाक्षीचयाभवेत् ॥ भर्त्ताचम्रियतेत
स्यानियतंदुःखभागिनी ॥४१४॥ पूर्णचन्द्रमुखीकन्याबालसूर्यसमप्रभा ॥ विशालनेत्राबिम्बोष्ठीसाकन्यालभतेसुखम् ॥४१५॥ रेखाभिर्बहुभि

क्लेशंस्वल्पाभिर्धनहीनता ॥ रक्ताभिःसुखमाप्नोतिकृष्णाभिःप्रेष्यतांव्रजेत् ॥ ४१६॥ काय्योंऽपिमंत्रीपत्नीस्यात्सखीस्यात्करणेषुच ॥ स्नेहेषुमा
यमातास्याद्वेश्याचशयनेशुभा ॥ ४१७॥ अंकुशंकुण्डलंचक्रंयस्याःपाणितलेभवेत् ॥ पुत्रंप्रसूयतेनारीनरेन्द्रंलभतेपतिम् ॥ ४१८॥ यस्यास्तुरो-
मशौपार्श्वौरोमशौचपयोधरौ ॥ उन्नतौचाधरोष्ठौचक्षिप्रंमारयतेपतिम् ॥ ४१९॥ यस्याःपाणितलेरेखाप्राकारतोरणंभवेत् ॥ अपिदासकुलेजाता-
राज्ञीत्वमुपगच्छति ॥ ४२०॥ यस्याअनामिकांगुष्ठौपृथिव्यांनैवतिष्ठतः ॥ पतिंमारयतेक्षिप्रंस्वेच्छाचारेणवर्तते ॥ ४२१॥ यस्यागमनमात्रेणभू-
मिकम्पःप्रजायते ॥ पतिंमारयतेक्षिप्रंस्वच्छाचारेणवर्तते ॥४२२॥ चक्षुःस्नेहेनसौभाग्यंदन्तस्नेहेनभोजनं ॥ त्वचःस्नेहेनशयाञ्चपादस्नेहेनवाह
नम् ॥ ४२३॥ स्निग्धोन्नतौताम्रनखौनार्य्याश्चचरणौशुभौ ॥मत्स्यांकुशाब्जचिह्नौचचक्रलांगललक्षितौ ॥ ४२४॥ अस्वेदिनौमृदुतलौप्रश
स्तौचरणौस्त्रियाः ॥शुभजंघेविरोमेचऊरूहस्तिकरोपमौ ॥४२५॥ अश्वत्थपत्रसदृशंविपुलंगुह्यमुत्तमम् ॥ नाभिःप्रशस्तागंभीरादक्षिणाव-
र्त्तिकाशुभा ॥४२६॥ अरोमात्रिबलीनार्य्याहृत्स्तनौरोमवर्जितौ ॥ उद्धृताकपिलायस्यारोमराजीनिरन्तरम् ॥ अपिराजकुलेजातादासी
त्वमुपगच्छति ॥४२७॥ समुद्रोक्तंप्रवक्ष्यामिनरस्त्रीलक्षणंशुभम् ॥येनविज्ञातमात्रेणअतीतानागतप्रभा ॥४२८॥ अस्वेदिनौमृदुतलौक
मलोदरसन्निभौ ॥ श्लिष्टांगुलीताम्रनखौपादावुष्णौशिरोज्झितौ ॥ कूर्मोन्नतौगूढगुल्फौसुपार्ष्णीनृपतेःस्मृतौ ॥ शूर्पाकारौविरूक्षौचव-
क्रौपादौशिरालकौ ॥४३०॥ संशुष्कौपाण्डरनखौनिःस्वस्यविरलांगुली ॥ मार्गायोत्करकौपादौकषायसदृशौतथा ॥४३१॥ विच्छिन्तिदौच
वंशास्प्रब्रह्मघ्नौशंकुसन्निभौ ॥ युगस्यायतनेतुल्याजंघाविरलरोमिका ॥४३२॥ मृदुरोमासमाजंघातथाकरिकरप्रभा ॥ऊरवोजानवस्तु-
ल्यानृपस्योपचिताःसमाः ॥४३३॥ निःस्वस्यभृगालजंघारोमैकैकञ्चकूपके ॥ नृपाणांश्रोत्रियाणाञ्चद्वेद्वेश्रियेत्रधीमताम् ॥ ४३४॥
च्यार्थैर्निःस्वामानवाःस्युर्दुःखभाजश्चनिन्दिताः ॥ केशाश्चैवकुञ्चिताश्चप्रचासेम्रियतेनरः ॥४३५॥निर्मांसजानुःसौभाग्यमल्पैर्निम्नैरतः
स्त्रियाम् ॥ विकटैश्चदरिद्राःस्युःसमांसैराज्यमेवच ॥ ४३६॥ महद्भिरायुराख्यातंह्यल्पलिंगोधनीनरः ॥ अपत्यरहितश्चैवस्थूललिंगोधनो-
ज्झितः ॥४३७॥ मेढ्रेवामनतेचैवसुतार्थरहितोभवेत् ॥वक्रेऽन्यथापुत्रवान्स्याद्दारिद्र्यंविनतेत्वधः ॥ ४३८॥अल्पेतुतनयोलिंगेशिरालेऽथसु

खीनरः ॥ स्थूलग्रंथियुते लिंगे भवेत्पुत्रादिसंयुतः ॥ ४३९॥ कोषगूढेनृपो दीर्घैर्भुग्नैश्च धनवर्जितः । बलवान्युद्धशीलश्च लघुशेफः सएवच
॥ ४४०॥ दुर्बलस्त्वेकवृषणो विषमाभ्यांचरुःस्त्रियाम् ॥ समाभ्यां क्षितिपः प्रोक्तः प्रलम्बेन शताब्दवान् ॥ ४४१॥ ऊर्ध्वद्वाभ्यांबहु यायूरक्तैर्मणि-
भिरीश्वराः ॥ पाण्डरैर्मणिभिर्निःस्वामलिनैः सुखभागिनः ॥ ४४२॥ सशब्दनिःशब्दमूत्राः स्युर्दरिद्राश्च मानवाः ॥ एकद्वित्रिचतुःपञ्चषड्धारा
दिभिरेवच ॥ ४४३॥ दक्षिणावर्तचलितमूत्राभिश्च नृपाः स्मृताः ॥ विकीर्णमूत्रा निःस्वाश्च प्रधानसुखदायिकाः ॥ ४४४ ॥ एकधाराश्च व
निताः स्निग्धैर्मणिभिरुन्नतैः ॥ समैः स्त्रीरत्नधनिनो मध्ये निम्नैश्च कन्यकाः ॥ ४४५॥ महाभोगी मांसगंधे यन्वास्यान्मांसगन्धिनि ॥ पुत्राः शु
के मत्स्यगन्धे तनुशुक्रे च कन्यकाः ॥ ४४६॥ शुष्कैर्निस्स्वा विशुष्कैश्च दुर्भगाश्च प्रकीर्तिताः । पुष्पगन्धे नृपाः शुक्रे मधुगन्धे धनंबहु ॥ ४४७॥
दरिद्रः क्षारगन्धे च दीर्घायुः शीघ्रमैथुनी ॥ अशीघ्रमैथुन्यल्पायुः स्थूलस्फिक्स्याद्धनोज्झितः ॥ ४४८॥ मांसलस्फिक्सुखी स्याच्च सिंहस्फि
क्भूपतिः स्मृतः ॥ भवेत्सिंहकटी राजा निःस्वकपिकटिर्नरः ॥ ४४९॥ सर्पोदरा दरिद्राः स्युः पिठरैश्च घटैः समाः ॥ धनिनो विकलैः पार्श्वैर्निःस्वा
वक्रैश्च निम्नगैः ॥ ४५०॥ समकक्षाश्च भोगाढ्या निम्नकक्षा धनोज्झिताः ॥ नृपाश्चोन्नतकक्षाः स्युर्जिह्मा विषमकक्षकाः ॥ ४५१॥ मत्स्योद
रा बहुधना नाभिभिः सुखिनः स्मृताः ॥ विस्तीर्णाभिर्वर्तुलाभिर्निम्नाभिः क्लेशभागिनः ॥ ४५२॥ बलिमध्यगता नाभिः शूलबाधांकरोतिहि ॥ वा
मावर्तश्च साध्यं वै मेधां दक्षिणतस्तथा ॥ ४५३॥ पार्श्वायुता चिरायुः स्यात्सूपरिष्टाद्धनेश्वरम् ॥ अधोगवाढ्यं कुर्याच्च नृपत्वं पद्मकर्णिका ॥ ४५
४॥ एकबलिः शतायुः स्यात् स्त्रीभोगी हि बलीस्मृतः ॥ त्रिबलिः स्यात्प आचार्यऋजुभिर्बलिभिः सुखी ॥ ४५५॥ अगाम्यगामी जिह्मबलिर्भू
पाः पार्श्वैश्च मांसलैः ॥ मृदुभिः सुषमैश्चैव दक्षिणावर्तरोमभिः ॥ ४५६॥ विपरीतैः परप्रेष्या निर्द्रव्याः सुखवर्जिताः ॥ अनुद्धतैश्चुचूकैश्च भव
न्ति सुभगा नराः ॥ ४५७॥ निर्धना विषमैर्दीर्घैः पीतोपचितकैर्नृपाः ॥ समोन्नतञ्च हृदयमकम्पं मांसलं पृथु ॥ ४५८॥ नृपाणामधमानाञ्च ख
ररोमशिरालकम् ॥ अर्थवान्समवक्षाः स्यात्पीनैर्वक्षोभिरूर्जितः ॥ ४५९॥ वक्षोभिर्विषमैर्निःस्वाः शस्त्रेण निधनास्तथा ॥ विषमैर्जत्रुभिर्निः
स्वा अस्थिनद्धैश्च मानवाः ॥ ४६०॥ उन्नतैर्भोगिनो निम्नैर्निःस्वाः पीनैर्धनान्विताः ॥ निःस्वश्चिपिटकण्ठः स्याच्छिराशुष्कगलः सुखी ॥ ४६१॥

शूरः स्यान्महिषग्रीवः शस्त्रान्तोमृगकण्ठकः ॥ कम्बुग्रीवश्चनृपतिर्लम्बकण्ठोऽतिभक्षकः ॥ ४६२॥ अरोमशो शुभपृष्ठं शुभञ्चाशुभमन्यथा ॥ कक्षा
चारवदलाश्लेष्टासुगन्धिर्मगरोमिका ॥ ४६३॥ अन्यथात्वर्थहीनानां दारिद्र्यस्य च कारणम् ॥ समांसौ चैव शुभाल्पौ श्लिष्टौ च विपुलौ भुजौ ॥ ४६४॥
आजानुलम्बितौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥ निस्वानां रोमशौ ह्रस्वौ श्रेष्ठौ करिकरप्रभौ ॥ ४६५॥ हस्तांगुलय एव स्युर्दीर्घा युद्धारनिभाः शुभाः ॥ मेधाविना
ञ्च सूक्ष्माः स्युर्भृत्यानां चिपिटाः स्मृताः ॥ ४६६॥ स्थूलांगुलीभिर्निःस्वाः स्युर्नताः स्युः सुकृशौ स्तदा ॥ कपितुल्यकरा निःस्वा व्याघ्रतुल्यकरैर्धि
नम् ॥ ४६७॥ पितृवित्तविनाशश्च निम्नात्करतलान्नराः ॥ मणिबन्धैर्निगूढैश्च सुश्लिष्टैः शुभगन्धिभिः ॥ ४६८॥ नृपा हीनैः करच्छेदैः सशब्दैर्धन
वर्जिताः ॥ संवृतैश्चैव निम्नैश्च धनिनः परिकीर्त्तिताः ॥ ४६९॥ प्रोत्तानकरदातारो विषमैर्विषमान्नराः ॥ करैः करतलैश्चैव लाक्षाभैरीश्वरस्तनैः
॥ ४७०॥ परदाररताः पीतै रूक्षैर्निःस्वा नरा मताः ॥ तुषतुल्यनखाः क्लीबाः कुटिलैः स्फुटितैर्नराः ॥ ४७१॥ निःस्वाश्च कनखैस्तद्वद्विवर्णैः परत
र्ककाः ॥ ताम्रैर्भूपा धनाढ्याश्च अंगुष्ठैः सयवैस्तथा ॥ ४७२॥ अंगुष्ठमूलजैः पुत्री स्याद्दीर्घांगुलिपर्वकः ॥ दीर्घायुः शुभगैश्चैव निर्धनो विरलांगु
लिः ॥ ४७३॥ धनांगुलिश्च सधनस्तिस्रो रेखाश्च यस्य वै ॥ नृपतेः करतलगा मणिबन्धात्समुत्थिताः ॥ ४७४॥ युगमीनांकितकरो भवेत्सत्रप्रदो
नरः ॥ वज्राकाराश्च धनिनां मत्स्यपुच्छनिभा बुधे ॥ ४७५॥ शंखातपत्रशिबिकागजपद्मोपमा नृपे ॥ कुम्भांकुशपताकाभामृणालाभा निः
धीश्वरे ॥ ४७६॥ दामाभाश्च गवाढ्यानां स्वस्तिकाभा नृपेश्वरे ॥ चक्रासितोमरधनुकुन्ताभा नृपतेः करे ॥ ४७७॥ उदूखलाभा यज्ञाढ्ये वे
दीभाश्चाग्निहोत्रिणि ॥ वापीदेवकुल्याभाश्च त्रिकोणाभाश्च धार्मिके ॥ ४७८॥ अंगुष्ठमूलगा रेखाः पुत्राश्च सुखदायकाः ॥ प्रदेशिनीगतारे-
खा कनिष्ठामूलगामिनी ॥ ४७९॥ शतायुषश्च कुरुते छिन्नाच्च तरुतो भयम् ॥ निःस्वाश्च बहुरेखाः स्युर्निर्द्रव्याश्चिबुकैः कृशाः ॥ ४८०॥ मांस
लैश्च धनोपेता आरक्तैरधरैर्नृपाः ॥ बिम्बोपमैश्च स्फुटितै रोष्ठै रूक्षैश्च खण्डितैः ॥ ४८१॥ विवर्णैर्धनहीनाश्च दन्ताः स्निग्धाः घनाः शुभाः ॥
तीक्ष्णदन्ताः समाः श्रेष्ठा जिह्वा रक्ताः समाः शुभाः ॥ ४८२॥ श्लक्ष्णा दीर्घा च विज्ञेया तालु श्वेतो धनक्षये ॥ कृष्णाच्च परुषा वक्त्रं समं सौम्यं
च संवृतम् ॥ ४८३॥ भूपानाममलं श्लक्ष्णं विपरीतं च दुःखिनाम् ॥ महादुःखं दुर्भगाणां स्त्रीसुखं पुत्रमाप्नुयात् ॥ ४८४॥ आढ्यानां व-

तुलंवक्त्रंनिर्द्रव्याणाञ्चदीर्घकम् ॥ भीरुवक्त्रःपापकर्माधूर्त्तानांचतुरस्रकम् ॥ ४८५॥ निम्नंवक्त्रमपुत्राणांकृपणानाञ्चह्रस्वकम् ॥ सम्पूर्णंभोगिनां
कान्तंश्मश्रुस्निग्धंशुभंमृदु ॥ ४८६॥ संहतञ्चास्फटितायंरक्तश्मश्रुश्चचौरकः ॥ रक्ताल्पपरुषश्मश्रुःकर्णाःस्युःपापमृत्यवः ॥ ४८७॥
निर्मांसैश्चिपिटैर्भोगाःकृपणान्हस्वकर्णकाः ॥ शंकुकर्णाश्चराजानोरोमकर्णाःशतायुषः ॥ ४८८॥ बृहत्कर्णाश्चधनिनोराजानःपरिकीर्त्ति
ताः ॥ कर्णैःस्निग्धैरनद्धैश्चव्यालम्बैर्मांसलैर्नृपाः ॥ ४८९॥ भोगीवैनिम्नगण्डःस्यान्मंत्रीसम्पूर्णगण्डकः ॥ शुकनासःसुखीस्याच्च शुष्क
नासोऽतिजीवनः ॥ ४९०॥ छिन्नाग्रकूपनासःस्यादगम्यागमनेरतः ॥ दीर्घनासेचसौभाग्यंचौरश्चाकुञ्चितेन्द्रियः ॥४९१॥ मृत्युश्चिपिटि
नासःस्याद्धीनभाग्यवतांभवेत् ॥ स्वल्पछिद्रासुपुटाअवकाश्चनृपेश्वरे ॥४९२॥ क्रूरेदक्षिणवक्रास्याह्वलिनाञ्चऋतुतंसकृत ॥ स्याद्विनिष्पि
ण्डितंह्रादिसानुनादञ्चजीवकृत ॥४९३॥ वक्रान्तैःपद्मपत्राभैर्लोचनैःसुखभागिनः ॥ मार्जारलोचनैःपापामधुरात्मामधुपिंगलैः ॥४९४
॥ क्रूराःकेकरनेत्राश्चहरिताक्षाःसकल्मषाः ॥ जिह्मैश्चलोचनैःशूराःसेनान्योगजलोचनाः ॥ ४९५॥ गम्भीराक्षाःईश्वराःस्युर्मंत्रिणः
स्थूलचक्षुषः ॥ नीलोत्पलाक्षाविद्वांसःसौभाग्यंश्यामचक्षुषाम् ॥४९६॥ स्यात्कृष्णतारकाक्षाणामक्ष्णामुत्पाटनंकिल ॥ मण्डलाक्षाश्चपा
पाःस्युर्निःस्वाःस्युर्दीनलोचनाः ॥४९७॥ दृक्स्निग्धाविपुलाभोगाअल्पायुर्नातिरुन्नता ॥ विशालोन्नताःसुखिनोदरिद्राविषमभ्रुवः ॥४९
८॥ स्त्रीष्वगम्यास्वासक्ताःस्युःसौभाग्यपरिवर्जिताः ॥ उन्नतैर्विपुलैःशङ्खैर्ललाटैर्विषमैस्तथा ॥ ४९९॥ निर्धनाधनवन्तश्चअर्द्धेन्दुसदृशैर्न
राः ॥ आचार्याःशुक्तिविशालैःशिरालैःपापकारिणः ॥ ५००॥ उन्नताभिःशिराभिश्चस्वस्तिकाभिर्धनेश्वराः ॥ निम्नैर्ललाटैर्वधार्हाःक्रूरक
र्मरतास्तथा ॥५०१॥ संवृतैश्चललाटैश्चकृपणाउन्नतैर्नृपाः ॥ अनश्रुस्निग्धरुदितमदीनमश्रुभंनृणां ॥५०२॥ प्रचुराश्रुयुतंदीनंरुदितञ्चसुखाव
हम् ॥ अकम्पंहसितंश्रेष्ठंनिमीलितमघावहम् ॥५०३॥ असकृद्धसितंदुष्टंसोन्मादस्यह्यनेकधा ॥ ललाटोपसृतास्तिस्रोरेखाःस्युःशतवर्षिणाम्
॥५०४॥ नृपत्वंस्याच्चतसृभिरायुःपञ्चनवत्यथ ॥ अरेखेणायुर्नवतिर्विच्छिन्नाभिश्चपुंश्चलाः ॥५०५॥ केशान्तोपगताभिश्चअशीत्यायुर्नरोभवे
त् ॥ पंचभिःसनाभिःषड्भिःपंचाशद्बहुभिस्तथा ॥५०६॥ चत्वारिंशच्चवक्राभिस्त्रिंशद्भ्रूलग्नगामिभिः ॥ विंशतिर्वामवक्राभिरायुःक्षुद्राभि

ग्रोधेभविष्यति ॥ ५५३॥ ॥इतिश्रीज्योतिर्विद्कुलावतंसव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेमिश्रस्कंधेसामुद्रिकशास्त्रनिरूपणंनामाष्टमोध्यायः ८॥ ॥अथाग्रेस्वप्नमार्तण्डाध्यायोभविष्यति॥ ॥ ॥

॥अथसामुद्रिकलक्षणाध्यायविषयानुक्रमणिका॥

पत्र	श्लो	विषयाः	पत्र	श्लो.	विषयाः	पत्र	श्लो.	विषयाः	पत्र	श्लो.	विषयाः
		तिरेखा फलनिर्णयः	१६	३१५	बाणप्रहारोदरव्यथारेखा	१९	४१४	वेदरेखा·	२०	४६१	तत्र शुक्लपक्षकृष्णपक्षयो
१५	२६४	विवाहरेखा	१६	३१६	शत्रुदुःखरेखा	१९	४२०	अथनंदनामानिधिलक्षणं-			न वामदक्षिणहस्तदर्शननि
१५	२६६	अथसंतानसंबंधिरेखानिर्णं	१६	३१७	मित्रप्राप्तिरेखा·			फलंच·			र्णयः
१५	२७१	अथ भ्रातृ भगिनीरेखा.	१६	३१८	मातापिता मृत्युज्ञानरेखा·	१९	४२८	अथ मुकुंदनिधि लक्षणं	२०	४६२	वामहस्तरेखां फलानिविविधा०
१६	२८६	अथपुण्यधर्मतीर्थरेखा नि०	१६	३१९	पूर्वपश्चाद्दुःखसुखज्ञानरे०			फलंच·	२०	४७६	पुंसः द्वात्रिंशल्लक्षण नामानि
१६	२९७	अथविद्यारेखा यशोरेखा.	१६	३२५	निरंतरं सुखदुःखरेखा·	१९	४३२	अथकच्छपनिधि लक्षणंफ	२०	४७७	एषां फलानि
१६	३०४	अथकाकपदफलं·	१७	३२६	अंगुलिनांसर्वपर्वेषुरेखाफलं			लंच·	२०	४८७	स्नेहस्य लक्षणं
१६	३०७	अथकेदारेखा·	१७	३२८	विंशोपकाफलं	१९	४३७	अमृतहस्तलक्षणं.	२१	४९०	पुंसः गुणत्रयलक्षणं
१६	३०८	भाग्यरेखा·	१७	३२९	अथद्वात्रिंशल्लक्षणनामानि	१९	४४०	पूर्वोक्तावशिष्टयव लक्षणं	२१	४९१	पुंसः स्वर्गमर्त्यनर्क गमागम
१६	३०९	मुत्स्यपथिलरेखा·	१७	३३१	शंखमीनपद्ममकराणां-	१९	४४१	एकादशोत्तरशतशंखादि			ज्ञान लक्षणानि·
१६	३१०	मित्ररेखा·			फलानि·			चिन्हानांशुभाशुभफल			इति द्वितीय प्रकरणं
१६	३११	पदरेखा.	१७	३३७	मकरनिधिफलं.			निर्णयः			अथपुरुषांगलक्षणं·
१६	३१२	पद्मरेखा·	१७	३४१	शंखनिधिफलं·	१९	४४६	स्त्रीणां अंकुशकुंडलादि	२१	१	मंगलं.
१६	३१३	अश्वपालखीरेखा	१७	३४५	पद्मनिधिफलं.			चिन्हफलं.	२१	४	पादपार्ष्णिगुल्फादिल०
१६	३१४	यात्रारेखा.	१७	३५२	मत्स्यफलं	२०	४६१	पुरुषस्य वामहस्तविमर्शनं	२१	६	जंघाल०

पत्र	श्लो.	विषयाः	पत्र	श्लो.	विषयाः	पत्र.	श्लो.	विषयाः	पत्र	श्लो	विषयाः
४७	४३५	प्रवासेमरणंतच्चिन्हानि	४८	४५७	चुचुक ल.	४८	४८२	दंताः ल.	४९	५११	सर्वगात्रस्थसमविंशत
४७	४३७	लिंगलक्षणं.	"	४५८	हृदय ल.	४८	४८३	तालु: ल.			भाशुभ फलं.
४८	४४१	वृषण लक्षणानि.	"	४५९	वक्ष ल.	"	४८३	वक्त्र. ल.	"	५१३	त्रिगंभीरं.
"	४४२	मणिलक्षणानि.	"	४६१	कंठ. ल.	४९	४८७	श्मश्रु. ल.	४९	५१४	त्रिविस्तीर्णं.
"	४४३	मूत्रधाराफलं.	"	४६२	ग्रीवा ल.	४९	४८७	कर्ण. ल.	४९	५१४	षडून्नतं
"	४४६	शुक्रगंधफलं.	"	४६३	अंसा ल.	४९	४९०	गंड ल.	४९	५१५	ह्रस्वानिचत्वारि.
"	४४८	शीघ्राशी मैथुनफलं	४८	४६४	बाहू ल.	४९	४९०	नासिका ल.	"	५१५	सप्तरक्तानि.
"	४४८	स्फिक् लक्षणं.	"	४६६	अंगुलीलक्षणं.	४९	४९३	क्षुतं ल.			इतिपुरुषांगलक्षणं.
"	४४९	कटिलक्षणं.	"	४६७	करलक्षणं.	४९	४९४	नेत्र. ल.	४९	५१७	अथस्त्रीलक्षणानि.
"	४५०	उदरलक्षणं.	"	४७०	करतललक्षणं.	"	४९८	भ्रूव ल.	"	५१८	पादतलं.
"	४५०	पार्श्व. ल	"	४७२	नखलक्षणं.	"	४९९	ललाटलक्षणफलं.	"	५१८	नख. ल.
"	४५१	कक्ष. ल.	"	४७३	अंगुलीलक्षणं	"	५०२	हसितं	"	५१९	गुल्फ. ल.
"	४५२	नाभि. ल.	"	४७५	कर. ल.	"	५०४	ललाटरेखाफलं	४९	५२०	जंघा. ल.
४८	४५५	उदरवलिफलं.	"	४७७	पुत्ररेखा	४९	५०८	शिरः. ल.	४९	५२१	जानु ल.
४८	४५६	रोम ल.	"	४७९	विविधरेखाफलं.	४९	५०९	केश. ल.	४९	५२१	ऊरू लक्षणं.

पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः
४६	४०६	पताकाल.	१७	३५९	पद्मल.	४३	२१८	बाणल.	१८	३९९	मत्स्यफलं.	१७	३३२	मकरल.	४९	५३१	मालाल.
१८	३८७	परशुल.	१८	३७१	पद्मल.	१८	३९२	ब्रह्मतीर्थल.	१८	४०७	मत्स्यफ.	१७	३३७	मकरल	४३	२१३	मनुषशिरल
४३	२१२	परशुल.	४६	३४७	पद्म.ल.	४६	३५०	बाणल.	१८	३८९	मत्स्यफ.	११	५१८	मर्कटल.	१९	४१८	मार्जारल.
४७	४०७	पट्टिशल.	४९	५११	पद्मल.	१८	३९८	भृंगार	१८	३९८	मत्स्यफ.	११	४८	मंदिरल.	४३	२३०	यवल-फ.
४३	२२८	पाश.	१८	३५४	पद्मल.	४३	२१४	भेदिनी.	४५	३४५	मत्स्यफ.	४३	२१५	मंदिरल.	१८	३९४	यवल.
१९	४१९	पाली	१८ ४८	३६? ४०६	पद्मल. पद्मल.	१८	३७०	मुकुटल.	५०	३३१	मत्स्यफ.	४६	३५२	मंदिरल.	१८	३९८	यवल.
४३	२२८	पानभाजन	२०	७४	पुष्पदामल.	१८	३९१	मूशलल.	१८	३९६	मत्स्यलांगुल	१७	३९१	मयूरल.	१२	४५०	यवल.
४३	२१२	पानभाजन	१८	३६३	पुष्पदामल.	१९	४०१	मूशलल.	४८	४७५	मत्स्यपुच्छफ	११	४१	मयूरल.	४९	५३०	यवल.
१७	३६१	प्रासादल.	४३	२१४	पुस्तकल.	१८	३६६	मूशलल.	४३	२११	मेषमस्तक.	१८	३०६	मृणालल.	४८	४७२	यवल.
१९	४७	प्रासाद.	४३	२१६	पुस्तकल.	१७	३३२	मत्स्यमीनफ	४३	२२६	मेषमस्तकल	१८	३७१	मर्द्दलल.	११	१०५	यवल.
१८	३९७	प्राकार	१८	३७७	पुस्तकल.	१७	३५३	मत्स्यफ.	४३	२२४	मुरवल.	१८	३७२	माणिल.	४३	२३०	योनिल.
१८	४००	पीठक	४३	२२७	पुस्तकल.	१७	३५४	मत्स्यफ.	४३	२२०	मस्तकल	१८	३७५	मठल.	४६	३५२	योनिल.
२०	५०	पद्मल.	४८	४७१	सुत्रसेरवाल.	१७	३६१	मत्स्यफ.	१८	४०३	मृदंगल.	४६	३४९	माषाकारल	४३	२११	योनिल.
१७	३३२	पद्मल.	१८	३६७	पूर्णकुंभल.	१७	३६३	मत्स्यफ.	१८	३८८	मकरल.	२०	५०	मालाल.	४३	२३०	यूपल.
१७	३४५	पद्म	१९	४१३	पुष्पलक्षणं.	१८	३८५	मत्स्य.	१८	३९१	मकरल.	१८	३९८	मालाल.	१८	३९२	यूपल:

पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः
१८	३९८	यूपल.	१८	३९२	चापील.	४९	५२०	वज्रल.	१७	३६४	शक्तिल.	४२	१९०	शंखल.	४२	१९०	शक्तिल.
४९	५३०	यूपल.	४८	४७८	चापील.	४८	४७५	वज्रल.	१८	३८७	शक्तिल.	४८	४७८	शंखल.	४६	३७८	शक्ति नाग
१८	३७२	युगल.	१८	३९६	वृश्चिकल.	१७	३५५	वज्रल.	१८	४०८	शक्तिल.	४९	५२१	शंखल.			कादि दशाप
१८	३६९	रथल.	१९	४१७	वृषभल.	१८	३६५	वज्रल.	१८	३७५	शक्तिल.	११	८७	शंखल.			येतच्छफलानि
४३	२१८	रथल.	१८	३७८	वृष.ल.	१८	३८५	वज्रल.	१८	३९०	शैल.ल.	१७	३३१	शंखल.	१८	३७२	षट्कोण.
१८	३९९	रथल.	४३	२११	वल्ली.ल.	१८	३९८	ध्वजल.	१८	३९१	शरल.	१८	३७३	शंखल.	१८	३९५	समुद्रल.
१८	४०२	रथल.	४३	२२३	वाहनल.	१८	३०२	विमानल.	१८	३७२	शरल.	१७	३४१	शंखल.	१९	४१५	समुद्रल.
१९	४१७	रथल.	१८	३८८	वेदील.	१८	३७५	वृक्षल.	१८	४००	शफलल.	१७	३५९	शंखल.	१८	३७२	सरोवरल.
१८	३७८	रथल.	४८	४७८	वेदील.	४९	५३१	वृक्षल.	४३	२१२	शूलल.	१८	३८५	शंखल.	१८	३८२	समुद्रल.
४६	३५१	रथल.	४३	२१३	वेदिकाल.	४३	२१४	वर्तुलल.	१८	३८४	शूलल.	१९	४१८	ध्यानल.	१९	४८	सरोवरल.
४६	३४६	रज्जुल.	४९	५३१	वेदिकल.	१८	३९८	श्रीवत्सल.	१८	३९९	शंखल.	४८	४७५	शिबिकाल	४३	२११	सिंहासनल.
५०	५३१	रथल.	४३	२१४	वीणाल.	१८	३६३	श्रीवहल.	१८	४०४	शंखल.	१८	३८५	शिबिकाल	४३	२३४	सिंहासनल
१९	४१०	लांगुलल.	४३	२२८	वीणा	१८	३९८	श्रीवृक्षल.	४३	२११	शंखल.	१८	३७४	शक्तिद्वीप	४७	३६२	सिंहासनल
४६	३५३	कुलालल.	४८	४७३	वीणा	४६	३५०	शक्तिल.	४६	३५८	शंखल.			दशसंख्या	१८	३७६	सिंहासनल.
१८	३८८	चापील.	१८	३९८	वज्रल.	१७	३६४	शक्तिल.	४२	१८५	शंखल.			फलंच.	१८	३९५	सुखासनफ.

पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः	पत्र	श्लो	विषयाः
१९	४१६	सुरवासन्नल	१८	३८१	स्वस्तिकल.	१८	३७६	हस्तिगजफ.			सामुद्रिकं
४३	२११	सूर्यफलं.	४३	२१२	स्वस्तिकल.	१८	३७८	हस्तिगजफ.	४९	३४	अथहरगौरी सामुद्रि
४६	३५३	सूर्यफ.	४३	२१४	स्वस्तिकल.	१८	३८१	हस्तिगजफ.			कं लक्षणं चमत्कृति
४३	३२४	सूर्यफ.	४८	४७७	स्वस्तिकल.	४६	३५२	हस्तिगजफ.			करं.
१७	३६२	सूर्यफ.	५०	१३१	स्वस्तिकल.	४९	५३०	हस्तिगजफ.	४६	२०१	अथ गर्गमुनि प्रणीतं
१८	३७६	सूर्य.फ.	१८	३९८	स्तंभल.	४८	४७६	हस्तिगजफ.			सामुद्रिकं.
१८	४०५	सूर्यफ.	१९	४१६	सिंहफ.	४२	१७८	अथ प्रल्हाद	४७	१९३	अथगरुडपुराणोक्तं
४३	२१८	सर्पफ.	४३	२१५	हलल.			प्रणीतहस्त			सामुद्रिकलक्षणं.
४३	२१४	सर्पफ	४३	२२६	हलल.			सामुद्रिकं च	५०	५६७	अथ ग्रंथालंकारः
१८	३१६	सर्पफ.	४९	५२०	हलल.			मत्कृतिकरं			इति सामुद्रिकाध्याय
१९	४१८	सर्पफ.	४३	२२३	हस्तिगजल	४२	२३९	अथ प्रल्हा-			विषयानुक्रमणिका
१८	३७०	सर्पफ.			[illegible]णांफलंच.			द प्रणीतं अं			समाप्ता
१७	३६३	स्वस्तिकल.	१८	३९८	हस्तिगजफ.			गसामुद्रिकं			
१८	३७१	स्वस्तिफल.	१९	४१६	हस्तिगजफ.	४	२९८	अथ प्रल्हा-			
१८	३८६	स्वस्तिकल.	४३	२११	हस्तिगजफ.			द प्रणीतं स्त्री			

अथ तंत्रपार्श्वपुस्तकानि.

विषयाः	पत्रसं	किं०	विषयाः	पत्रस	किं०	विषयाः	पत्रस	किं०
उपासनारत्नचक पूर्वभागः	१४५८	१६।=	अनेकदेवतामंत्रोद्धारकोश	६१	९।	बृहदिंद्रजालसाधनाध्याय		१
बृहज्ज्योतिषार्णवोक्तः			तन्त्रमंत्राः ॥			धनुर्यासमाहात्म्यं	१०	·।·
अध्यायसंख्या १००			अजपागायत्रीउपासनाध्यायः	८१	९।।।·	षट्त्रिंशद्यक्षिणीसाधनं	१८	·।=
श्लोकसंख्या ६४०००			बृहत्पूजानिबंधाध्यायाः २५	१७६	३।।।·	सामुद्रिकलक्षणाध्यायः॥	५८	१८=
पत्रसंख्या १४५८			पुरश्चरणनिर्णयाध्यायः	२५	।।–	स्वप्नमार्तंडाध्यायः ॥	२४	·।।·
शिष्यलक्षणशिष्यकृत्य-	४६	९।·=	बृहत्कुंडमंडपमार्तंडाध्यायः	१८०	३।।।·	कालज्ञानाध्यायः ॥	१७	·।=
गुरूपासनाध्यायौ.			अनेकास्त्रविद्याध्यायः	१७	·।।·	वर्णसंकरजातिनिरूपणा	३८	९।·
दीक्षाध्यायाभिषेकाध्यायौ	४०	।।।·।।	सिद्धशाबरमंत्रसंग्रहाध्यायः	१६	·।।·	ब्राम्हणोत्पत्तिमार्तंडाध्यायः भाषार्थसह	२४२	४
बीजकोशाध्यायः वर्णानु-			शीतलादेव्युपासनाध्यायः	११	·।·	भद्रमार्तंडाध्यायः सचित्रः	२६	१
क्रमसहितःस्पष्टबीजप्रकाशः	१६	१	शरभोपासनाध्यायः	२९	·।।=	देवतापीठनिर्णयाध्यायः	२७	·।।–

Hyderabad (deccan) City Aurangabad

इतिबृहज्ज्योतिषार्णवोक्तबृहत्सामुद्रिकाध्यायः

समाप्तः

यहपुस्तक निजाम शहर औरंगाबाद श्रीगायत्री मंदीर विद्याप्रकाश छापखानेमेंपंडित हरिकृष्ण व्यंकटरामके पासमिलेगा. और यह पुस्तकु रजिष्टर करके सबतऱ्हे हक्क मालकने अपनेपासरखाहै.

।बृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधे अथ स्वप्नमार्तण्डाध्यायोनवमः९प्रारभ्यते।।

श्रीगणेशायनमः वृषवाहनविघ्नेशौहंसवाहंसरस्वतीं स्वेष्टंश्रीबटुकंनत्वापितरंत्र्यंबकंततः १ श्रीगौतमकुलोत्पन्नोज्योति
र्विद्व्यंकटात्मजः हरिकृष्णःकरोत्यत्रस्वप्नमार्तण्डमुत्तमं २ दक्षिणेश्रीमहाराष्ट्रदेशेचनगरंबृहत् औरंगाबादसंज्ञंवैचास्तित
त्रजनिर्मम ३ ब्रह्मवैवर्त्तमत्स्यादिपुराणानिविलोक्यच स्वप्नचिंतामणिंचैवबार्हस्पत्यमतंतथा ४ पाम्रादिकान्समालोक्यस्वप्न
मार्तण्डउच्यते सम्यगस्यविचारेणफलंजानातिमानवः ५ अथस्वप्नोनाम किंतदाह जागदवस्थायांयद्दृष्टंयत्कृतंयच्छ्रुतं
तंतज्जनितवासनयानिद्रासमयेयःप्रपंचःप्रतीयतेसास्वप्नावस्थेतिगीयते उक्तंच दिनेमनसियद्दृष्टंतत्सर्वंलभतेनिशि ६ अ-
थस्वप्नफलाधिकारीक इत्युच्यते समधातोःप्रशांतस्यधार्मिकस्यातिनिरुजः स्यातांपुंसोजितास्वस्यस्वप्नौसत्यौशुभाशुभौ
७ अथनवविधःस्वप्नः अनुभूतः१ श्रुतो२ दृष्टः३ प्रकृतेश्चविकारजः४ स्वभावतःसमुद्भूतश्चिंतासंततिसंभवः६॥८॥
देवताद्युपदेशोऽस्थो७ धर्मकर्मप्रभावजः८ पापोद्रेकसमुत्थ९श्चस्वप्नःस्यान्नवधान्नृणां९ अथस्वप्नफलव्यवस्था प्रकारै
रादिमैःषड्भिरशुभैश्चशुभैरपि दृष्टोनिरर्थकःस्वप्नःसत्यस्तुत्रिभिरुत्तरैः १० सुस्वप्नेक्षणेनस्वप्यंकथ्यमानंचसद्गुरोः दुःस्वप्नंपुन
रालोक्यकार्यःप्रोक्तोविपर्ययः ११ बार्हस्पत्ये वात्तिकंपैत्तिकंचैवश्लेष्मजंचिंतयायुतं पुरुषःप्राप्ययंस्वप्नंप्रत्ययेनलभेत्क-
चित् १२ मालास्वप्नोऽह्निदृष्टश्चतथाधिव्याधिसंभवः मलमूत्रादिपीडोत्थःस्वप्नःसर्वोनिरर्थकः १३ व्याधितेनसशोकेनचिं-
ताग्रस्तेनचैवहि कामकर्त्तव्यकश्चैवदृष्टःस्वप्नोनविद्यते १४ दुःस्वप्नाद्दृश्यतेयेनतेननिद्रांचकारयेत् ततोनास्याशुभंतस्य
शुभमेवभविष्यति १५ गाणपत्ये येदृष्टास्वात्मनिस्वप्नाःस्वस्यैवफलदाश्चते परंप्रतिचतेनस्युःफलदाःकिंचिदात्मनि १६
ब्रह्मवैवर्त्ते दृष्ट्वास्वप्नंचनिद्रालुर्यदिनिद्राप्रयातिच विमूढोवक्तिचेद्रात्रौनलभेत्स्वप्नजंफलं १७ दिगंबरोमुक्तकेशोनलभेत
स्वप्नजंफलं अथस्वप्नद्वयव्यवस्था मात्स्ये एकस्यांयदिवारात्रौशुभंवायदिवाशुभं १८ पश्चाद्दृष्टस्तुयस्तत्रतस्यपाकंविनिर्दि
शेत् तस्माच्छोभनकेस्वप्नेपश्चात्स्वप्नोनदृश्यते १९ बार्हस्पत्ये दुःस्वप्नोवाथसुस्वप्नोप्रत्यक्षंदृश्यतेयथा स्वापेतथाचवृत्तंचे

च्छांतिंकुर्यान्तुनान्यथा २० चिंतामणौ पूर्वमनिष्टंदृष्ट्वास्वप्नंयःप्रेक्षतेशुभंपश्चात् सतुसफलस्तस्यभवेद्दृष्टव्यंतद्वदिष्टेऽपि २१
स्वप्नमनिष्टंदृष्ट्वासुप्यात्पुनरपिनिशामवाप्यथ नक्तंकथमपिकथयेत्केषांचित्फलतिनसयस्मात् २२ विवेकविलासे अशुभः
प्राक्शुभःपश्चाच्छुभोवाप्रागथाशुभः पाश्चात्यःफलदःस्वप्नोदुःस्वप्नेशांतिरिष्यते २३ अथसमयबलेनस्वप्नस्यफलपाक-
कालः चिंतामणौ स्वप्नःप्रथमेयामेदृष्टःसंवत्सरेणफलदःस्यात् संवत्सरार्धफलदोद्वितीययामेत्रियामायाः २४ मासत्रयेणरा
त्रेतृतीययामेनृणांस्फुटंफलदः मासैकफलोदृष्टश्चतुर्थयामेभवेत्स्वप्नः २५ चरमनिशाघटिकाद्वयसमयेफलतिध्रुवंदशाहेन
सूर्योदयेतुदृष्टःसद्यःफलदायकःस्वप्नः २६ एवमेवसर्वग्रंथनिरूपितं अथागतस्वप्नस्यकथननिर्णयः चिंतामणौ देवगु
रुपूजनरतःपंचनमस्कारसंस्कृतःप्रातः नचफलविहस्तहस्तःकथयेदथबुद्धिवृद्धानां २७ ब्रह्मवैवर्त्ते उल्काकाश्यपगोत्रा
यविपत्तिंलभतेध्रुवं दुर्गतेदुर्गतिंयातिनीचेव्याधिंप्रयातिच २८ शत्रोर्भयंचलभतेमुर्खेचकलहोभवेत् कामिन्यांधनहानिः
स्याद्रात्रौचौरभयंलभेत् २९ निद्रायांलभतेशोकंपंडितेवांछितंफलं नप्रकाश्यश्चसुस्वप्नःपण्डितैःकाश्यपैर्द्विज ३० अथदुः
स्वप्नेशांतिः गाणपत्ये दृष्ट्वालोकितेस्वप्नेनिवेद्यब्राह्मणायतं आशीर्भिस्तोषितैर्विप्रैःपुनःस्वप्नान्नरेश्वरः ३१ नब्रूयाच्च
पुनःस्वप्नंस्नात्वापुण्यवारिभिः मृत्युंजयजपोहोमःशांतिःस्वस्त्ययनादिकं ३२ सेवाश्वत्थगवांप्रातर्दानंस्वर्णादिशक्तितः
श्रवणंभारतादीनांस्वप्नदोषप्रशांतये ३३ बृहस्पतिप्रणीतंचस्वप्नाध्यायंपठेदपि मात्स्ये कल्पस्नानंतिलैर्होमोब्राह्मणाना
चपूजनं ३४ श्रुतिश्चवासुदेवस्यतथातस्यैवपूजनं नागेन्द्रमोक्षश्रवणंज्ञेयंदुःस्वप्ननाशनं ३५ बार्हस्पत्ये रक्तचंदनका
ष्ठानिघृताक्तानिचहोमयेत् गायत्र्याऽष्टसहस्राणितेननिद्राचतिष्ठति ३६ अथपूर्वोक्तनवविधस्वप्नानांलक्षणं अनुभू-
तोनामवर्तमानदेहेनयच्छुभाशुभंकर्मकृतंतदुत्पन्नः १ ॥३७॥ श्रुतःनामस्वर्गनरकादिवृत्तांतंभारतादिकथाप्रसंगेनश्रुततदु-
त्पन्नः २ ३८ दृष्टः राजमण्डलसभाध्यक्षत्वचौरबंधनकारागृहादियत्प्रत्यक्षंदृष्टंतदुत्पन्नः ३ ॥३९॥ प्रकृतिविकारजः

नाम तल्लक्षणमुक्तंवैद्यसंग्रहे रुक्षंकृशांस्वल्पकेशंविकलंबहुभाषणं स्वप्नेरवगमनंयस्यवातप्रकृतिकःपुमान् ४० बुद्धिलंक्रो
धगौरादिस्वेदिस्वेताशिनोरुहं स्वप्नेतेजांसियःपश्यत्पित्तैःप्रकृतिकःपुमान् ४१ महाबलंस्निग्धकेशंसुप्रजांस्थिरमान
सं स्वप्नेजलाशयादींश्चश्लेष्मप्रकृतिकोनरः ४२ मिश्रैश्चिह्नैर्नरोज्ञेयोद्वंद्वजःसान्निपातकः कफेनतमसानिद्रामूर्छापि
त्ततमोद्भवः ४३ रजःपित्तानलैर्भातितंद्राश्लेष्मतमोनिलैः भवेद्ग्लानिःसमादुःस्वादजीर्णात्तमसःक्षयात् ४४ इतिप्रकृति
विकारजोनामस्वप्नश्चतुर्थः ४ स्वभावोद्भूतः नामपूर्वजन्मनिदृष्टश्रुतकृतयोगेनइहजन्मनियत्स्वप्नावस्थायांप्रकरोभ-
वतिसःपंचमः ५ ॥४५॥ एतदुक्तं श्रीभागवते यथानुमीयतेचित्तमुभयैरिन्द्रियेहितैः एवंप्राग्देहजंकर्मलक्ष्यतेचित्तवृत्तिभिः
४६ नानुभूतंक्वचानेनदेहेनादृष्टमश्रुतं कदाचिदुपलभ्येतयद्रूपंयादृगात्मनि ४७ अनेनवर्तमानदेहेनकुत्रचिदपियन्ना
नुभूतंअदृष्टअश्रुतंतत्कदाचित्स्वप्नमनोरथादिषुमनसिउपलभ्यैततत्पूर्वजन्मसंभवंजानीहि उक्तंच तेनास्यतादृशंरा
जन्लिंगिनोदेहसंभवं श्रद्धस्वाननुभूतोर्थोनमनःस्प्रष्टुमर्हति ४८ अदृष्टमश्रुतंचात्रक्वचिन्मनसिदृश्यते यथातथानुमंत-
व्यंदेशकालक्रियाश्रयं ४९ चिंतासततिसंभवोनाम संसारेचिंतायाबाहुल्यत्वादनेकविधाःस्वप्नाश्चिंतयाउत्पद्यंतेसःषष्ठः
६ ॥५०॥ देवताद्युपदेशोत्थः नामस्वप्नेश्वर्यादिसाधनेनयःउत्पद्यतेसःसप्तमः ७ ॥५१॥ स्वप्नेश्वरीसाधनं यथा मंत्रः
ॐ त्रिजटलंबोदरंकथयकथयस्वाहा अयंमंत्रः संकष्टचतुर्थीदिनेउपोषणंकृत्वात्रिशतंजपेत् रात्रौकांस्यपात्रेहिंगुलेनषोड
शारयंत्रंसंलिख्ययथाविधिनागणेशंसम्पूज्य रक्तपुष्परक्तचंदनदूर्वाक्षतदुग्धनैवेद्यादिभिः ततोशय्यायामस्तकसमीपे
तत्पात्रंसंस्थाप्यस्वमनोप्सितंसंकल्प्यस्वपेत्तदासत्यंकार्योद्देशकंस्वप्नंभवति ५२ अन्यच्च ॐ ह्रींश्रींह्रींऐंक्लींचक्रेश्वरिच
क्रधारिणीशंखचक्रगदाधारिणीममस्वप्नदर्शनंकुरु२ भविष्यंदर्शय२ हुंफट्स्वाहा शयनसमयेरात्रौ१०८ जपित्वामौनेनध्या
त्वाभूमौस्वपेत् स्वप्नेदेवताभविष्यंवदेत्नात्रसंदेहः ५३ अन्यच्च स्वप्नेश्वरीमंत्रः ॐनमोकृत्संवराहलीमदनस्वप्नेश्व

ह्रीमेस्वप्नंशीघ्रंदर्शय२स्वाहा एतन्मंत्रस्यायुतपुरश्चरणं ततस्तिलाज्यशर्कराजातिपत्रबिल्वपत्रैर्दशांशहोम: तेनसिद्धि:
तत:कार्यसमये अष्टोत्तरशताभिमंत्रितंजलंपीत्वास्वपेत् स्वकार्येस्वप्नंभविष्यति ५४ अन्यच्च पूर्वमेवायुतंजप्यात्तत:
कुष्टककल्केन सप्ताभिमंत्रितंहस्तौपादौ प्रक्षालयेत् स्वप्नेशुभाशुभंकथयति त्रैलोक्यवार्तांकथयति मन्त्र: ॐनमोभग
वतिकर्णपिशाचिनीचण्डयोगिनीस्वाहा ५५ अन्यच्च ॐशुभाशुभंभगवतिपिशाचिनीकथयकथयठ:ठ:ठ:रात्रौ उ
पलपिष्टहरिद्रामेकत्रप्रेष्यकरपदोद्वर्तनंकृत्वास्वपेत् स्वप्नेशुभाशुभंपश्यति इत्याद्युक्तमतिविस्तरेण ५६ धर्मकर्मप्रभा
वज: नामइष्टापूर्तादिकर्मभिर्भविष्यसुखबोधकोऽष्टम: ८ ५७ पापोद्रेकसमुत्थोनाम कायिकादित्रिविधकृतपाप्म-
कर्मभिर्भविष्यदु:खसूचकोनवम: ९ ५८ इतिनवविधस्वप्नलक्षणं अथसत्पदार्थसंपत्यादु:स्वप्नमपिसुस्वप्नंभव-
ति तदाह चिंतामणौ उत्थायतत:प्रातर्ध्यायतियोवस्तुतोऽपिदिनमित्रं सनमस्कृतिमंत्रंवितथत्वंकथयतितस्य


स्वप्नेश्वरीयंत्रम्.

५९ पूजादीन्यपिरचयेद्देवगुरूणांतपश्चनिजशक्त्या सततंधर्मरतानांदु:स्वप्नोभवतिसुस्वप्न: ६० देवगु-
रूणांस्मरणंनामग्रहणंसुतीर्थानां विरचय्यस्वपितिसदानकदादु:स्वप्नमाप्नोति ६१ दु:स्वप्ननाशकसुस्वप्न
दायकमंत्र: पराशर: व्यासबिभीषणंभीष्मंयमंरामंद्रुमंबलिं सप्तैतान्संस्मरेन्नित्यंदुस्वप्नंतस्यनश्यति ६
२ अथस्वप्नविचारेकिंचिद्विशेष: येषांलाभोनशुभ:स्वप्नेतेषांशुभोपहारोऽपि येषानशुभ:प्राप:पुंसांतेषांशु
भस्त्याग: ६३ येलोकव्यवहारेनशुभास्तेशोभना:परंभणिता: येनशुभास्तेस्वप्नेविपरीता:केचिच्चपदार्था:
६४ नन्वेतदनुपपन्नंस्यान्निद्राशयनंस्वाप:स्वप्न:संवेशइत्यपीत्यमराभिधानेनिद्रास्वप्नयोरभेदात्
नैतत् सामान्येननिद्रास्वप्नयो:सत्यप्यभेदेअवांतरविशेषाद्भेदसंभवात् ६५ तथाहि जागर:स्वप्नसुषुप्ति
तुरीयाइत्यवस्थाचतुष्टयंयोगशास्त्रेप्रसिद्धं ६६ तत्रजागर: प्रसिद्ध: मनसोनिरिंद्रियप्रदेशावस्थानंनिद्रा

सैवसुषुप्तिरितिउच्यते यत्रतुषान्तःकरणजंज्ञानमस्तिसानिद्राएवस्वप्नइत्युच्यते तिसृभ्योऽपिविलक्षणातुरीयासाचयोगिनामेव
अतएवनैषधकाव्येप्रयोगः नकानिशिस्वप्नगतंददर्शतमिति स्वप्नागतंज्ञानमपिस्वप्नशब्देनोपचर्यते ६७ तथाचतल्लक्षणमाहुर्नै-
यायिकाः योगजधर्माननुगृहीतस्यमनसोनिरिंद्रियप्रदेशावस्थानंनिद्रा निद्राद्दष्टांतःकरणजंज्ञानंस्वप्नइति ६८ एवंस्वप्नशब्दे
ननिद्राविशेषस्तज्जन्यंज्ञानमप्युच्यते अतोनिद्रास्वप्नयोरवांतरभेदोऽस्तीतिसर्वमनवद्यं ६९ मुहूर्त्ततत्वेविशेषः अह्निगुरुषु
कथयेत्सत्यसन्नैववाच्यंचिंतारुक्जाल्पदीर्घविफलमिति अह्नीतिस्वप्नफलंसत्शुभंचेत्तद्गतंस्वप्नं अह्निदिवसेगुरुषुसान्निधौ
कथयेन्नतुरात्रौ असत्तुअशुभंतुवाच्यंनैव चिंताचरुक्चचिंतारुजौताभ्यांजातंचिंतारुग्जं तच्चाल्पंचदीर्घंचस्वप्नेदृष्टंविफलं
स्यात् ७० चिंतावशेनयद्दृष्टंव्याधिकोपेनचैवयत् यदल्पंदीर्घंबहुलंतत्फलंनभवेदिति ७१ अथदेवालयादौसुस्वप्नग्रहणवि-
धिः अद्भुतसागरे पराशरः शांतिसारे दुकूलमुक्तामणिभिर्नरेन्द्रःसामंतदैवज्ञपुरोहिताश्च तद्दैवतागारमनुप्रविश्यप्रवेशतस्त-
त्रदिगीश्वरंच ७२ अभ्यर्च्यमंत्रैस्सपुरोहितस्तुसंयम्यतस्यांभुविसंयतात्मा आह्नीशपूर्वामथभागपुष्पंकृत्वोपधानंशिरसिक्षि-
तीशः ७३ तथैकभुग्दक्षिणपार्श्वशायीस्वप्नंपरीक्षेतयथोपदेशं ७४ नमःशंभोत्रिनेत्रायरुद्रायवरदायच वामनायविरूपायस्व-
प्नाधिपतयेनमः ७५ भगवन्देवदेवेशशूलभृद्वृषवाहन इष्टानिष्टेममाचक्ष्वस्वप्नेसुप्तस्यशाश्वतः ७६ एकवस्त्रःकुशास्तीर्णे
सुप्तःप्रयतमानसः निशांतेपश्यतिस्वप्नंशुभंवायदिवाशुभं ७७ सत्याचार्यः आयुस्तृतीयभागेशेषेपतितःप्रकीर्त्तितःस्वप्नः
पित्तेऽधिकेकांचनरत्नमाल्यदिवाकराग्निज्वलनानिपश्येत् ७८ श्लेष्माधिकश्चंद्रभशुक्लपुष्पसरित्सरोंभोनिधिलंघनानि यदन्य-
मध्यप्रथमेनिशांतेप्रावृट्शरन्माधवसंज्ञितेवा ७९ कालेमरुत्पित्तकफप्रकोपःसाधारणंस्याद्बलसन्निपातात् दृष्टश्रुतानुभूतंच
पार्थिवंकथितंतथा ८० भावितंदोषजंचैवस्वप्नंसप्तविधंविदुः तत्रपंचविधंपूर्वमफलंभिषगादिशेत् ८१ अथस्शुभाशुभस्वप्नस्यफ-
लंदेशकालाकृतिवशेनकल्पनीयमित्याह पराशरः शुभाशुभस्वप्नविचारमुक्तमयुक्तंचसमूह्यबुध्या देशादिवर्णाकृतिसम्प्रदृश्य

तत्तत्फलंसंपरिकल्पयेच्च ८२ अथपुनरपिदुःस्वप्नशांतिमाह शांतिसारे पराशरः देवद्विजाग्निप्रतिपूजनानिमंत्रोपवासा
दिपवित्रमेव तिलान्नगोभूमिहिरण्यदानंदुःस्वप्नसंदर्शननाशनानि ८३ अथांबुसंस्पर्शनमंत्रहोमतिलप्रदानंतपनंचभूयः
शांतिर्जपोहोमतथान्नदानंदुःस्वप्नकृतृणिपयश्चाग ८४ तिलानामयुतंतत्रजुहुयात्तुसमाहितः तिलोसीतीतिमंत्रेणधेनुंदद्या
त्सदक्षिणां ८५ ब्राह्मणांस्तर्पयेत्तत्रदक्षिणाभोजनादिना दानंचविविधंदेयमशुभानांविनाशनं ८६ षड्भिर्मासैस्तुसम्पूर्णै
रन्यथामरणंभवेत् शौनकः यदानिष्टफलंस्वप्नंपश्येत्तस्योच्यतेविधिः ८७ स्नात्वाप्रभातेसांध्यंचउपास्यतदनंतरं
अद्यानोदेवसवितरित्यृचापूर्वमेकया ८८ ततःपरंपरंयच्चगोपदुःस्वप्नपंचभिः ऋग्भिःपरोमेराजन्पूज्यइत्याद्यृचात
था ८९ ऋग्भिःसर्वाभिरेताभिरुपतिष्ठेतभास्करं एवंकृतेतुदुःस्वप्नदर्शनंनिष्फलंभवेत् ९० अधःस्वप्नस्येतिजप-
न्प्रातःप्रातर्दिनेदिने दुःस्वप्नंनुदतेकृत्स्नंनतस्माद्विंदतेभयं पारिजाते शौनकः स्वप्नोत्पातेषुचैतेषुकालरात्र्यधि
दैवता पूजाविधानपूर्वोक्तंकुर्यात्तत्रापियत्नतः ९२ रात्रिसूक्तकल्पवदित्यर्थः होमंकुर्यात्प्रयत्नेनरात्रावेवद्विजोत्त
मः ९३ प्रत्यृचंपायसंहुत्वारात्रींव्यख्यदितिक्रमात् अष्टोत्तरशतंहुत्वासूक्तेनानेनयत्नतः स्वप्नाधिपतिमंत्रेणहुनेदष्टो
त्तरंशतं ९४ कालरात्रेर्नाममंत्रेणेत्यर्थः गुरवेदक्षिणांदद्याद्वस्त्रंहेमपशूनपि यद्युक्तदक्षिणादानेप्यशक्तोहोमकर्म-
णि ९५ हिरण्यदक्षिणांदद्यात्तदानीमेववाबुधः वस्त्रकुंभादिसकलंतद्धोत्रेप्रतिपादयेत् ९६ याम्याशांतिश्चात्रोक्ता
बह्वृचश्रुतौ संपद्येतेषांकिंचित्पश्येदुपोष्यपायसंस्थालीपाकंश्रपयित्वारात्रीसूक्तेनप्रत्यृचंहुत्वान्येनान्नेनब्राह्मणान्भो
जयित्वाचरुंस्वयंप्राश्नीयात् ९७ अत्रलक्षहोमश्चण्डिकापाठादिशांतिरपिकार्या क्वचिद्दर्शवच्छ्राद्धेनापिदुःस्वप्ननाशः
विष्णुसहस्रनामस्तोत्रजपेनेतिचधर्मसिंधुः ९८ यामेद्वितीयेषण्मासैःफलंचेतिपुरोदितं द्वितीयेचाष्टभिर्मासैरितिचांगिर
सोब्रवीत् ९९ अथस्वप्नेश्वर्युपासनामाह उक्तंचमंत्रमहोदधौमंत्रकोशेच प्रणवःकमलास्वप्नेश्वरिकार्यंचमेवद

स्वाहात्रयोऽर्णोर्थं मंत्रो भुन्यादिपूर्ववत् १०० स्वप्नेश्वरीमाह्नप्रणवइति प्रणवओं कमलीश्रीं स्वरूपमन्यत् असिवेदा
श्चिभूयुग्मनंत्रार्णैरंगकंमनोः विन्यस्यदेवतां ध्यायेत्स्वप्नेशीमिष्टसिद्धये १०१ वराभयेपद्मयुगं दधानां करैश्चतुर्भिः क
नकासनस्थां सितांबरां शारदचंद्रकांतिं स्वप्नेश्वरीं नौमि विभूषणाढ्यां १०२ ध्यानमाह वरेतिवरोदक्षे लक्षंजपेद्बिल्वप
त्रैर्जुहुयात्तद्दशांशतः पूर्वोदितेयजेत्पीठेषडंगंत्रिदशायुधैः १०३ त्रिदशा इन्द्रादयः रात्रौसम्पूज्यदेवेशीमयुतंपुरतोः
जपेत् शयीत ब्रह्मचर्येण भूमौदर्भास्थिताजिनेः १०४ देव्यैनिवेद्यस्वहार्दंसास्वप्नेवदतिध्रुवं यक्षिण्याद्याइतिप्रोच्यमात
गीगद्यतेऽधुना १०५ स्वप्नमार्तंडकाऽध्यायेचाद्यप्रकरणंशुभं हरिकृष्णेन कथितंपरिभाषाख्यकंमहत् १०६ इतिबृ
हज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधेनवमेस्वप्नमार्तंडाध्यायेपरिभाषाप्रकरणंप्रथमं १ अथशुभस्वप्नफलप्रकरणमाह
स्वप्नचिंतामणौ स्वप्नेमानवमृगपतितुरंगमातंगवृषभसुरभीभिः युक्तंरथमारूढोयोगच्छतिभूपतिःसस्यात् १०७
शुभ्रेणदक्षिणस्यांयः फणिनादृश्यतेनिजभुजायां आसादयतिसहस्रंकनकस्यसपंचरात्रेण १०८ सद्यश्छिद्यताशि
रःस्वप्नेयस्यस्वयंछिनत्तिचयः सद्राज्यंसुप्राज्यंभजतेरंकोऽपिकोऽपिनरः १०९ लिंगच्छेदेलभतेसौभाग्यंचैवयो
षितःपुरुषः योनिच्छेदेविंदतियोषापुरुषात्तदेवफलं ११० छिद्यतेयस्यजिह्वाशस्त्रैःकेनापिवास्वयंस्वप्ने क्षत्रियम
नुजोराजाशेषस्तुविशेषतोऽधिपतिः ११० आरूढःशुभ्रमिभंनदीतटेशालिभोजनंकुरुते सभुनक्तिभूमिमखिलां
जातिविहीनोऽपिधर्मघनः १११ यःसूर्यचंद्रमसोर्बिंबंग्रसतेसमग्रमपिचपुनः कलयतिदीनोऽपिमहींससुवर्णांसार्ण
वांनियतं ११२ योमानुषीयमामिषमात्मीयंचापिमानवःसांद्रं स्वेच्छस्वप्नेस्वदतेसप्राज्यंराज्यमाप्नोति ११३ प्रासादतुं
गशृंगेभुक्त्वायस्तरतितोयधिमगाधं दास्याभिजातिजातोमनुजपतिर्जायतेमनुजः ११४ छर्दिपुरीषंखादितुमिच्छ
तिनयश्चजगुप्सितेमनुजः दर्शनमुपलेपोवायस्यतयोस्तस्यलाभःस्यात् ११५ योमानुषस्यमस्तकचरणकरस्या

पिभक्षणंकुरुते राज्यंकनकसहस्रंतदहादाप्नोत्यसौक्रमशः ११६ भद्यंसद्योमांसंध्रुवमास्वादयतिवीक्षतेलभते ता
म्यामंगाभ्यंगोयस्यभवेत्तस्यधनवृद्धिः ११७ मूत्रंशुक्रंशोणितमपिपिबतिनगर्हतेतथातेषां यस्यालोकनमनुले
पनंचतस्यापिवृद्धिःस्यात् ११८ नलिनीदलेनिषण्णोमध्येसलिलाशयस्यपरमान्नं घृतखण्डयुतंभुंक्ते पूज्यसचराज्य
माप्नोति ११९ भक्षयतिवीक्षतेशुभफलकुसुमान्युच्चिनोत्यवाप्नोति यःस्वप्नेतस्यमुहुर्गृहाग्रणेलुठतिखकुलक्ष्मीः
१२० आरोप्यधनुषिमौर्वीमवनिभरभरितसंवलदिग्वलयम् योहंतिशरैःसैन्यंप्राप्नोतिससम्पदंसपदि १२१ वधबं
धमथननिर्भर्त्सनानिविदधातियोविपक्षाणां प्रक्षेपणंचगुप्तौससंपदायुज्यतेनियतं १२२ कलहेयस्यविवादेजायारीः
णांपराजयोभवति भण्डलमहिलाग्रहणंप्रजायतेतस्यधनधान्यं १२३ भक्षयतिक्षैरेयींप्रासादशिलासुक्षीरवृक्षस्थः
यःकनकरजतपात्रैःप्रथतेपार्थिवपदंतस्य १२४ योवेडामधिरोहतियस्यामुत्तरतिभृशमभिन्नायां कृत्वाप्रवासमा
रात्कृतकृत्यःसपुनरायाति १२५ नगनगरग्रामवनैःसहितांभूमिंसमुद्रसंवीतां उत्तरयतियोभुजाभ्यांनीचोऽप्य
चिरेणसनृपःस्यात् १२६ म्रियतेविषेणपुरुषोयःपिबतिविषनिर्भयःपुरुषः उपचीयतेसभोगैरोगैःसत्यज्यतेसत्यम्
१२७ योरक्ताभ्यक्तांगःस्वप्नेस्वविवाहमीक्षतेदक्षः जगतिधनधान्यलक्ष्म्यान्नृपलक्ष्मीस्तंसमुपलक्षयति १२८ रु
धिरधुनिपुनिमज्जनमथवापानंचयस्यरुधिरेण रुधिरस्रावीगात्रात्तस्यभृशंभवतिधनवृद्धिः १२९ यःस्वयमपिघात
यतिस्वप्नेयस्याभिहन्यतेचशिरः लभतेकनकसहस्रंसभूमिभोगांश्चभूमिपतेः १३० यस्मिन्वातस्मिन्वानिजजिह्वाग्रे
णलिखतियत्किमपि मांडलिकोभुविलभतेराज्यंशेषस्तुखेकुलक्ष्मीं १३१ यानारीनरभावंनारीभावंनरोऽपियोलभते
तौवर्धतेसार्धंकुटुंबवृध्यासहजवृध्या १३२ आरुह्यमत्तकरिणंदेहिनमन्यंचयुध्यतेयदियः यदिजायतेनभीतोभवेद्ध्रु
वंतस्यधनलाभः १३३ यःसिंधुरमधिरूढोमृण्मयमपितोयधिमगाधं योयुध्यतेचैवनभमिच्छापृथ्वीपतिःसस्यात् १

३४ पार्थिवइतियत्राधितः प्रथमंचौरस्ततोवनंपश्चात् ध्रुवमनुसरतिस्वप्नेसबुध्यतेप्राज्यराज्याय १३५ मूत्रपुरीषैः
पुरुषःस्वप्नेयः स्वपितिलिप्तसर्वांगः मध्येश्मशानमभयंप्राप्नोतिसाम्राज्यराष्ट्रफलं १३६ योयातिदिशमुदीचींप्राचीं
वागौरगोयुतंयानं अधिरूढोजागर्त्तिप्रबाढंतस्यार्थलाभःस्यात् १३७ अंगप्रत्यंगयुतान्नवरोमविवर्जितातनुर्यस्य
वृद्धिप्रासातंनरमनुसरतिकलत्रमिवलक्ष्मीः १३८ यःपातयतिनिकेतंस्वप्नेदारचतस्यविवृणोति व्यसनात्प्रमुच्य
तेसत्वरितंप्राप्नोतिधनधान्यं १३९ जागर्तियस्तुसतमसिधेनुधनुरूपानहोलब्ध्वा पदवींदवीयसीमपिगत्वासत्वरित-
मायाति १४० पानमपानेननरः पिबतिनिषद्धोविमुच्यतेयदिवा विप्रस्यसोमपानंशेषस्यधनसिद्धिसिद्धिःस्यात् १४१
आजानुनिबिडनिगडैर्योभुजबंधेनवापिबध्येत प्रभवतितुतस्यपुनःपदप्रतिष्ठाथकष्टेन १४२ योनरमंत्रैस्तत्रैर्ग्रामं
वावेष्टयेत्स्वयंस्वप्ने नगरेवसुधाधिपतिर्ग्रामेवाभवतिमाण्डलिकः १४३ निम्नात्कूपात्तोयाद्गतदीधितिरोहतिस्थलीं
भीतः दिष्ट्यासमेधयायः संवर्धयतिविविधधान्येन १४४ खादंतिवेष्टयंतिस्वप्नेमशकाश्चमक्षिकादंशाः प्राप्नोतिप्रो
षितामपिसयोषितंवित्तमचिरेण १४५ सरितःसरांसिकमलान्युद्यानान् पर्वतांस्तथासौधान् यःकोपार्तः पश्यतिशो
केनसमुच्यतेत्वरितं १४६ स्फीतंफलंप्रसूनंरक्तंवादीयतेध्रुवंयेषां कनकस्यभवतिलाभः सुपद्मरागस्यवातेषां १४७प
श्यतिसैकेलिकमलांयःशुचिसिचयोत्तरांनारीं लक्ष्मीःसरस्वतीवातस्यप्रकरीभवतिनियतं १४७ शुभ्रांगरागमण्डन
वसनंदधतिसयौवनायुवती यंपरिरभतेभवतिश्रीस्तस्यसखीवसर्वतोऽभिमुखी १४८ कर्णेकुण्डलयुगुलंमुक्ताहा
रोगलेशिरसिमुकुटं यस्यांगदंभुजयुगेमहींमहीयान्स्सपालयति १४९ शुभ्रांबरत्ताशोचनरोचनपरिदेवनानिमरणंवा
यस्यस्वप्नेसुमुखंलभतेखलुसर्वतोऽभिमुखं १५० इंदुसमैः सितकुसुमैरुपहारंयोगृहांगणेदत्ते नरपतिलक्ष्मीःकुरुतेकर्म
करीत्वंस्वयंतस्य १५१ शेतेमणिपर्यंकेयोमणिसिंहासनंस्वमुपविशति पुरुषैःसुवेषवेषैर्ललितशुभंजायतेतस्य १५२

निजपाणियोवीणामादायविबुध्यतेविपुलपुलकः सुकुलधनरूपमान्यांलभतेकन्यांचरतिमान्यां १५३ देहोवसनं
यस्यप्रासादंशयनमासनंयानम् ज्वलतिज्वालाकुलितंतस्यश्रीः सर्वतोऽभिमुखी १५४ योवासोभिरदभ्रैः शुभ्रैः परिवे
ष्टितोनरःस्वप्ने दहनेनदह्यतेखलु सःश्रेयोभाजनंभवति १५५ यःकालभवंपुष्पंफलंच भक्षयतिवीक्षतेलभते शाका
निपेशलानिचसविंदतेसंपदंसपदि १५६ दृष्टिनिपातंबहुलच्छायाफलकुसुमतरुयुतंशैलं ज्वलदनलंयःपश्यतिप्र
वेतध्रुवंतस्यवश्याश्रीः १५७ शकुनिंचतुष्पदंवायःस्वप्नेसमधिगम्यबुध्येत रूपवतींसलभतेकांतांसपरिच्छदांनियमा
त् १५८ योवृषमानुषकुंजरतुरगप्रासादशिखरशिखरंच आरुह्यपिबतिजलधिंबुध्येततथैवसनृपःस्यात् १५९ शि
रसिज्वलितनिकेतेग्रामपुरांगस्थितेऽपिजागर्ति सप्तांगंसप्तदिनैर्मनुजःसाम्राज्यमाप्नोति १६० यःफणिवृश्चिककी
टकश्वापदविहगैर्विदश्यतेवश्यं नखकुहृदिभवतिभीतःसवित्तमापद्यतेसद्यः १६१ शांतेपयसिस्नानंलेखनमवगाह
नंचयःकुरुते पत्नीबंधुजनैःसहतस्यभवेद्धान्यधनवृद्धिः १६२ मातापितरौदेवान्साधून्नृपतिंचवीक्षतेभक्त्या
मुंचतिरोगीरोगंविपर्ययोभवतिविपरीते १६३ सितविहगंसिततुरगंसितमातंगंसितानिभवनानि यःपश्यत्यवरोह
तिलभतेप्राज्यंससाम्राज्यं १६४ धान्योच्चयमधिरोहतिगिरिशृंगंयोवनस्पतिंफलितं सकलंचिंतितमचिरात्तस्य
भवेन्नेहसंदेहः १६५ क्षीरद्रुममधिरोहतिबहुलफलंयःस्वयंघनच्छायं जागर्तिचतत्रस्थःस्वप्नेप्राप्नोतिसधनानि १६६
स्वप्नेध्वजशक्रध्वजरथदेवायतनमंचकादीनां वीक्षणमथाधिरोधोधनधान्यकरोभवेत्पुंसां १६७ प्राकारपाथयानक
कांचनतोरणसितातपत्राणां दर्शनमथाधिरोहोधनधान्यकरोभवेत्पुंसां १६८ उल्काग्रहतारााणांतडित्त्विषामर्चिषाम्
पतितानां गर्जनसज्जघनानांप्रदर्शनंस्पर्शनञ्चशुभं १६९ पातंजलधिनदीनांतरणंचविगुंफनंचप्रसूनानाम् पचनं
श्वपचादीनांयःकुरुतेभवतितस्यशिवं १७० मृण्मयभाण्डावाप्तिधनधान्येधन्यताचपशुप्राप्तिः भूपत्वस्याङ्कमेलीभा

न्मंत्रस्थमंत्रिखं १७१ पश्भुगोदोहंस्वमुखेवेणो: परिवादनंचकुरुतेय: हननंनिजपक्षणांससंपदायुज्यतेसपदि १७१मि
त्राणांवं धूनांसुजनानांचारुवर्णवेषाणां वीक्षणमथकमलानांधारणमिष्टन्नृणांस्वप्ने १७२ योवृषभसुरभसुरभीतुरंगमातं
गमृगपतीन्स्वप्ने पश्यत्यथाधिरोहतिलभतेवाभवतितस्यशुभं १७३ सिंहासनरत्नोपचयप्रासादयूपसुरविमानानां
वीक्षणमध्यारोहणमासिर्वावृद्धयेपुंसाम् १७४ ओदनदधिदुग्धानांदर्शनमशनंधनायसमवाप: भक्ष्याणामपरेषामपि
परमान्नस्यचस्वप्ने १७५ कलहंसचाषसारसचातकशितिकण्ठचक्रवाकानां आलोकनंनिनाद: पुंसाधनधान्यदोभवति
१७६ शुकसारिकाचकोरकपारावतपेकिपिककुलुंचानां धनसम्पत्तिनिमित्तंप्रदर्शनंभवतिशब्दोऽपि १७७ य:शेते
प्रविषीदत्यंगारामिषपुरीषनिकरेषु तस्यधनमानधान्यवृद्धिर्वाभवतिकनकस्य १७८ क्षेत्रोद्यानवनानिद्विजराजांस्त
थागुरून्देवान् य:सेवतेप्रपश्यतिधनधान्यैर्वृध्यतेसभृशं १७९ स्वप्नेपूर्णनिशाकरदिनकरयोर्यदिनवोदयंगतयो: य
स्यापिदर्शनंस्याद्राजश्रीरज्यतेतस्य १८० वृक्षंसमीक्षतेय: फलितंवापुष्पितंततोलभते फलितेचिंतितमचिरात्सुपुष्पि
तेष्वुत्तमवित्तं १८१ य: पश्यतिसर्वज्ञंविरचितपूजंस्वदेवतांचापि तस्यभवेद्धनलाभोविपुलतरासिद्धिबुद्धिरपि १८२ स्वप्ने
वडवांक्रौंचींलब्ध्वाय: कुक्कुटींचजागर्ति विंदतिसधनांकन्यांप्रियंवदांसुंदरींचासौ १८३ पिबतिस्निग्धंदुग्धंदोहनभांडास्थि
तंसफेनंय: स्यात्तस्यसोमपानंनियतंमांगल्यमन्यदपि १८४ लाभेप्रदर्शनेवागोधूमानांधनागम: पुंसां यज्ञागमोयवा
नांविद्याधिगमोस्यतर्पमानोय: १८५ भूपाविप्रागवोदेवा: पितरश्च लिंगिन: स्द प्र यद्यद्वदंतितत्तत्पुरुषस्यतथैव
लभ्यंस्यात् १८६ ध्वजसंभ ञोभुजायांतरुवल्लीगुल्मरोहणंनाभौ स्याद्यस्यसोऽपिसत्पंनित्यंनवियुज्यतेलक्ष्म्या १
८७ सितविग्रहै: सिततुरगैर्यस्यभवतिदिव्यपथगमनं त्रिदशविमानैश्चतथासमहींसुहुरश्नुतेकृत्स्नाम् १८८ य:पश्य
त्यात्मानंस्वप्नेधूमपिबंतमतिगाढं धूमायन्तंचनरस्तस्यविभूतिर्भवतिमहती १८९ हवनहुताशनस्यज्वालाजटिलस्य

धूमरहितस्य ग्रसनंचतथाप्रथनंशुभावहंभवतिमनुजानां १९० क्षेत्रेवारिविमोक्षोदर्शनलाभौचजातधान्यानां गृहसंस्थानंचतथापुंसांसम्पत्तिसुखहेतुः १९१ गमनमगम्यस्त्रीणांयोभक्षणमप्यभक्ष्यवस्तूनां विदधातिविगतशंकः सशंकतेदेवतोपिनवै १९२ स्वप्नेमृगपतिविहगानांवारिशंखशुक्तिमुक्तानां ग्रहणंभवतिद्वेधाकल्याणकरंसुसंपदांपुंसां १९३ ग्रसनंवसुंधरायाजलसेतोर्बंधनंविधत्तेयः व्यालसदाम्नोग्रहणंभवतिशुभंतस्यमनुजस्य १९४ चतुरंगस्यबलस्यप्रदर्शनंभवतियस्यपुरुषस्य मृतकस्यतथास्वप्नेतस्यचकल्याणकैवल्यं १९५ विद्रुमवल्लीशखानशुक्तिर्मुक्ताःकपर्दकान्स्वप्ने यःपश्यतिदत्तान्वासवित्तमाप्नोतिनचिरेण १९६ केयूरहारमुकुटग्रैवेयककंकणांगुलीयानि यःकर्णाभरणंचालभतेपश्यतिशिवंतस्य १९७ कर्णावतंसशेखरलालाटिकपत्रवल्लरीः स्वप्ने यःप्रेक्षतेकरोतिचकलयतिमनुजस्यकल्याणं १९८ नंद्यावर्तस्वस्तिकदीपपताकासुमृत्तिकादूर्वा मांगल्यान्यपराण्यपियःपश्यतिभवतितस्यशुभं १९९ व्यजनसृणिकलशभाजनमुकुरध्वजचामरातपत्राणां लाभःस्वप्नेदर्शनस्पर्शोवावृद्धयेपुंसां २०० केलिर्विलासिनीभिर्वस्त्रालंकारमण्डनयुताभिः तस्यचकन्यालाभःपशुसम्पत्तिर्भवेत्तस्य २०१ कार्मुकचक्रादीनिस्वप्नेशस्त्राणिधौतवस्त्राणि पश्यत्यथलभतेयःसंक्रामतिभूपचक्रमिदं २०२ कलधौतकनकरूपकमरकतवैडूर्यशोणमणीन् यःपश्यतिलभतेवाशुभलाभोभवतितस्यभृशं २०३ मानतुलाभाण्डानांशयनासनयानवस्त्राणां स्वप्नेशुभायलाभोदर्शनमपिशस्तमेतेषां २०४ षष्टिकशालिकतंदुलमुद्गकणाद्यांयुगंधरान्नूनं पश्यतिलभतेभुंक्तेप्रजायतेतस्यधनधान्यं २०५ स्वप्नेदर्शनलाभौवीणायावादनंचयस्यस्यात् योस्यंवहिततुर्यरवंशृणोतिसंपद्भवेत्तस्य २०६ वापीकूपतडागग्रामारामेषुयःपरिभ्रमति देवगृहेषुस्थानंभवतिनचिरेणतस्यशुभं २०७ सर्वज्ञप्रतिमायायात्रास्वापोपहारपूजादीन् योविदधातिस्वप्नेतस्यभवेत्सर्वतोवृद्धिः २०८ लक्ष्मींसरस्वतींवाजिनपतिबिंबंविबुध्यतेप्राप्य योगोत्रदेवतांवाध्रुवंभवतितस्यधनधान्यं २०९ कमलाकररत्नाकरजलसम्पूर्णा

पगाः सुहृन्मरणं यःपश्यतिलभतेसावनिमित्ततोवित्तमतिविपुलं २१० स्वप्नेपीयूषरसंपुरुषोयःपिबतिदेवतादत्तं
आरोहतिगरुडंवावहतिमहींबाहुनासचिरं २११ सुरभिप्रसूनमालामम्लानांवीक्षतेऽथयोलभते निक्षिपतिकण्ठपीठेतं
नृपलक्ष्मीःस्वयंवृणुते २१२ आज्यंप्राज्यंस्वप्नेयोविंदतिवीक्षतेप्रशस्तस्य तस्याभ्यवहरणंवाक्षीरान्नेनसहसशत्रुज
नशास्ता २१३ गीतध्वनिवेदध्वनिबृंहितसिंहस्यनादहयहेषा योभृशमाकर्णयतिप्रजायतेतस्यशुभलाभः २१४ मे-
रुगिरौकल्पतरौयोवस्थानंकरोतिविलसतिवा शाड्वलभूमिंपश्यतिसुखधनसंपद्भवेत्तस्य २१५ गगनेसुरभवनवीथीयः
स्वप्नेपांडुराध्वरखण्डानि सुरचापंवापश्यतितस्यभृशंभूरियशोलाभः २१६ पुन्नागनागकेसरचंपकशिरीषतिलकानां
कुसुमफलसंकुलानांप्रदर्शनंशोभनंस्वप्ने २१७ कदलीफलकरणीफलदाडिमनारिंगमातुलिंगानां दर्शनमशनंचशिवं
तद्विटपाःकुसुमिताश्चशुभाः २१८ राजादनमृद्वीकासहकारक्रमुकनालिकेराणां दर्शनमिष्टंतत्फललाभेक्षणभक्षणा-
नितथा २१९ कुरुषकनकाशोकश्रीचंदनमरिचपादपाःपुंसां इष्टाःस्वप्नेदृष्टंध्रुवंमुनीन्द्रैःपुराशिष्टैः २२० एलालवंगलव
लीकर्पूरफलानिसुरभिगंधीनि जातिफलंचपश्यतियःखादयतितस्यभवतिशिवं २२१ मुचकुंदकुंदजातीविचिकिलनव
मल्लिकाप्रसूनानि यःपश्यतिवालभतेतस्यशिवंजायतेसततं २२२ श्वेतकरवीरयूथीशतपत्रीकेतकीबकुलकलिका
चंपकपाटलपुष्पाणिविंदतेयःशुभंतस्य २२३ विपुलोबहुलच्छायोबहुफलकुसुमगुच्छकच्छन्नः प्रांशुःसुपर्णनिबिडस्त
शुभोऽपिशुशोद्रुमःस्वप्ने २२४ प्लक्षश्रीतरुबिल्वन्यग्रोधकपित्थपादपान्स्वप्ने अपरोऽपक्षीरीतरुस्तत्फललाभाशनंच
शुभं २२५ अपहारोद्रव्याणांसीसत्रपुपित्तलादिधातूनां दात्राप्रतिपादितानांलाभःशस्योमनुष्यस्य २२६ येषांलाभो
नशुभःस्वप्नेतेषांशुभोपहारोऽपि येषांनशुभंप्रायःपुंसस्तेषांशुभस्त्यागः २२७ येलोकव्यवहारेनशुभास्तेशोभनाःप
रंभणिताः येचशुभास्तेस्वप्नेविपरीताःकेऽपिचपदार्थाः २२८ कृष्णंकृष्णमशस्तंमुक्त्वाराजीववानिगजदेवान् सकलं

शुक्लंचशुभंमुक्त्वाकार्पासलवणास्थिभस्मानि २२९ ब्रह्मवैवर्त्तेकृष्णजन्मखंडे नंदंप्रतिकृष्णउवाच गवांचकुंजराणां
चहयानांचव्रजेश्वर प्रासादानांचशैलानांवृक्षाणांचतथैवच २३० आरोहणंचधनदंभोजनंरोदनंतथा प्रतिगृह्यतथा
वीणांसस्याढ्यांभूमिमालभेत् २३१ शस्त्रास्त्रेणयदाविद्धोव्रणेनकृमिणातथा विष्ठयारुधिरेणैवसंयुक्तोप्यर्थवान्भवे
त् २३२ स्वप्नेप्यगम्यागमनोभार्यालाभंकरोतियः मूत्रसिक्तःपिबेच्छुक्रंनरकंचविशत्यपि २३३ नगरंप्रविशेद्रक्तंस
मुद्रंवासुधांपिबेत् शुभवार्तामवाप्नोतिविपुलंचार्थमालभेत् २३४ गजंनृपंसुवर्णंचवृषभंधेनुमेवच दीपमन्नंफलंपुष्पंक
न्यांछत्रंरथंध्वजम् २३५ कुटुंबंलभतेदृष्ट्वाचार्थपुण्यधनंलभेत् पूर्णकुंभंद्विजंवह्निंपुष्पतांबूलमंदिरम् २३६ शुक्लधा
न्यंनरंवेश्यांदृष्ट्वाश्रियमवाप्नुयात् गोक्षीरंच्चघृतंदृष्ट्वाकीर्तिंचविपुलांश्रियम् २३७ पायसंपद्मपत्रेचदधिदुग्धंघृतंमधु
मिष्टान्नंस्वस्तिकंभुक्त्वाध्रुवंराजाभविष्यति २३८ पक्षिणांमानुषाणांचभुंक्तेमांसंनरोयदि बह्वर्थंशुभवार्तांचलभतेवां-
छितंफलम् २३९ छत्रंवापादुकांवापिलब्ध्वाधान्यंचगच्छति असिंचनिर्मलंतीक्ष्णंतत्तथैवभविष्यति २४० हेलयासंत
रेद्योहिसप्रधानोभविष्यति दृष्ट्वाफलितंवृक्षंधनमाप्नोतिनिश्चितम् २४१ सर्पेणभक्षितोयोहिअर्थलाभश्चतद्भवेत् स्वप्ने-
सूर्यंविधुंदृष्ट्वामुच्यतेव्याधिबंधनात् २४२ वडवांकुक्कुटींदृष्ट्वाक्रौंचींभार्यांलभेद्ध्रुवम् स्वप्नेयोनिगडैर्बद्धःप्रतिष्ठांपुत्रमाल
भेत् २४३ दध्यन्नंपायसंभुंक्तेपद्मपत्रेनदीतटे विशीर्णपद्मपत्रेचसोऽपिराजाभविष्यति २४४ जलौकसंवृश्चिकंचसर्पंच
यदिपश्यति धनंपुत्रंचविजयंप्रतिष्ठांवालभेदिति २४५ शृंगिभिर्दंष्ट्रिभिःकोलैर्वानरैःपीडितोयदि निश्चितंचभवेद्राजाध
नंचविपुलंभवेत् २४६ मत्स्यंमांसंमौक्तिकंचशंखंचंदनहीरकम् यस्तुपश्यतिस्वप्नांतेविपुलंधनमालभेत् २४७ सुतंच
रुधिरंस्वर्णंभुक्त्वाविष्ठांधनंलभेत् प्रतिमांशिवलिंगंचलभेद्दृष्ट्वाजयंधनम् २४८ फलितंपुष्पितंबिल्वमाम्रंदृष्ट्वालभेद्धनम्
दृष्ट्वाचज्वलदग्निंचधनंबुद्धिंश्रियंलभेत् २४९ आमलकंधात्रीफलमुत्पलंचधनागमम् देवताश्चद्विजागावःपितरोलिंगिन

स्तथा २५० यद्ददातिमिथः स्वप्नेतत्तथैवभविष्यति शुक्लांबरधरानार्यः शुक्लमाल्यानुलेपनाः २५१ समाश्लिष्यंतिये
स्वप्नेतस्यश्रीः सर्वतःसुखम् पीतांबरधरानारीपीतमाल्यानुलेपनाम् २५२ अवगूहतियःस्वप्नेकल्याणंतस्यजायते
सर्वाणिशुक्लानिप्रशंसितानिभस्मास्थिकार्पासविवर्जितानि सर्वाणिकृष्णान्यतिनिंदितानिगोहस्तिवाजिद्विजदेववर्ज्य
म् २५३ दिव्यास्त्रीसस्मिताविप्रारत्नभूषणभूषिता यस्यमंदिरमायातिसप्रियंलभतेध्रुवम् २५४ स्वप्नेचब्राह्मणोदेवो
ब्राह्मणीदेवकन्यका ब्राह्मणोब्राह्मणीवापिसंतुष्टासस्मितासती २५५ फलंददातियस्मैचतस्यपुत्रोभविष्यति यंस्वप्ने
ब्राह्मणानंदकुर्वंतिचशुभाशिषम् २५६ यद्ददतिभवेत्तस्यतस्यैश्वर्यंभवेद्ध्रुवम् परितुष्टोद्विजश्रेष्ठश्चायातियस्यमंदि
रम् २५७ नारायणःशिवोब्रह्माप्रविशेत्तुतदाश्रमम् संपत्तितस्यभवतियशश्चविपुलंशुभम् २५८ पदेपदेसुखंतस्य
समानंगौरवंलभेत् अकस्मादपिस्वप्नेतुलभतेसुरभिंयदि २५९ भूमिलाभोभवेत्तस्यभार्याचापिपतिव्रता करेणकृत्वा
हस्तीयंमस्तकेस्थापयेद्यदि २६० राज्यलाभोभवेत्तस्यनिश्चितंचश्रुतोमतम् स्वप्नेतुब्राह्मणस्तुष्टः समाश्लिष्यतियंव्र
ज २६१ तीर्थस्नायीभवेत्सोऽपिनिश्चितंचश्रियान्वितः स्वप्नेददातिपुष्पंचयस्मैपुण्यवतेद्विजः २६२ जययुक्तोभवे
त्सोऽपियशस्वीचधनीसुखी स्वप्नेदृष्टाचतीर्थानिसोधरत्नगृहाणिच २६३ जययुक्तश्चधनवान्तीर्थस्नायीभवेन्नरः स्व
प्नेतुपूर्णकलशंकश्चित्कस्मैददातिच २६४ पुत्रलाभोभवेत्तस्यसंपत्तिंवासमालभेत् हस्तेकृत्वातुकुडवमाढकंवारसुंद
री २६५ यस्यमंदिरमायातिसलक्ष्मींलभतेध्रुवम् दिव्यास्त्रीयद्गृहंगत्वापुरीषंविसृजेद्द्विज २६६ अर्थलाभोभवेत्तस्य
दारिद्र्यंचप्रयातिच यस्यगेहंसमायातिब्राह्मणोभार्ययासह २६७ पार्वत्यासहशंभुर्वालक्ष्म्यानारायणोऽथवा ब्राह्मणो
ब्राह्मणीवापिस्वप्नेयस्मैप्रदीयते २६८ धान्यंपुष्पांजलिंवापितस्यश्रीःसर्वतोमुखी मुक्ताहारंपुष्पमाल्यंचंदनंचलभे
द्द्विज २६९ स्वप्नेददातिविप्रश्चतस्यश्रीःसर्वतोमुखी गोरोचनंपताकांवाहरिद्रामिक्षुदण्डकम् २७० सिद्धान्नंचलभेत्स्वप्ने

तस्यश्री:सर्वतोमुखी ब्राह्मणोब्राह्मणीवापिददातियस्यमस्तके २७१ छत्रंवाशुक्लधान्यंवासचराजाभविष्यति स्वप्नेर
थस्थ:पुरुष:शुक्लमाल्यानुलेपन: २७२ तत्रस्थोदधिभुंक्तेचपायसंवानृपोभवेत् स्वप्नेददातिविप्रश्चब्राह्मणीचसुधां
दधि २७३ प्रशस्तपात्रंयस्मैवासोऽपिराजाभवेद्ध्रुवम् कुमारीचाष्टवर्षीयारत्नभूषणभूषिता २७४ यस्यतुष्टाभवेत्स्व
प्नेसभवेत्कविपंडित: ददातिपुस्तकंस्वप्नेयस्मैपुण्यवतेचसा २७५ सभवेद्विश्वविख्यात:कवीन्द्र:पण्डितेश्वर: यंपाठ
यतिस्वप्नेवामातेवचसुतंतथा २७६ सरस्वतीसुत:सोऽपितत्परोनास्तिपण्डित: ब्राह्मण:पाठयेद्यंचपितेवयत्नपूर्वकम्
२७७ ददातिपुस्तकंप्रीत्यासचतत्सदृशोभवेत् प्राप्नोतिपुस्तकंस्वप्नेपथिवायत्रतत्रवा २७८ सपण्डितोयशस्वीच
विख्यातश्चमहीतले स्वप्नेयतोमहामंत्रंविप्रोविप्रेददातिचेत् २७९ सभवेत्पुरुष:प्राज्ञोधनवान्गुणवान्सुधी: स्वप्नेद
दातिविप्रंवाप्रतिमांवाशिलामयीम् २८० यस्मैददातिविप्रश्चमंत्रसिद्धिश्चतद्भवेत् विप्रोविप्रसमूहंचदृष्ट्वानत्वाशिषंल
भेत् २८१ राजेन्द्र:सभवेद्वापिकिंवाचकविपण्डित: शुक्लधान्ययुतांभूमिंयस्मैविप्र:समुत्सृजेत् २८२ स्वप्नेऽपिपरितु
ष्टश्चसभवेत्पृथिवीपति: स्वप्नेविप्रोरथेकृत्वानानास्वर्गंप्रदर्शयेत् २८३ चिरंजीवीभवेदायुर्धनवृद्धिर्भवेद्ध्रुवम् विप्राय
विप्रसंतुष्टोयस्मैकन्यांददातिच २८४ स्वप्नेचसभवेन्नित्यंधनाढ्योभूपति:स्वयम् स्वप्नेसरोवरंदृष्ट्वासमुद्रंवानदीनदम्
२८५ शुक्लाहिंशुक्लशैलंचदृष्ट्वाश्रियमवाप्नुयात् यंपश्यंतिमृतंस्वप्नेसभवेच्चिरजीविन: २८६ अरोगीरोगिणदु:खीसु:
खिनंचध्रुवंभवेत् दिव्यांस्त्रियंप्रवदतिममस्वामीभवानिति २८७ स्वप्नेदृष्ट्वाचजागर्तिसचराजाभवेद्दृढम् स्वप्नेकालिकां
दृष्ट्वालब्ध्वास्फटिकमालिकाम् २८८ इन्द्रचापंशक्रवज्रंसप्रतिष्ठांलभेद्ध्रुवम् स्वप्नेवदतियंविप्रोममदासोभवेतिच
२८९ हरिदास्यंचमद्भक्तिंसलब्ध्वावैष्णवोभवेत् स्वप्नेविप्रोहरि:शंभुर्ब्राह्मणीकमलाशिवा २९० शुक्लस्त्रीदेवमातावा
जाह्नवीवासरस्वती गोपालिकावेषधारीबालिकाराधिकामम २९१ बालश्चबालगोपाल:स्वप्नविद्भि:प्रकाशित: एतन्ते

कथितोनंदसुस्वप्नः पुण्यहेतुकः २९२ श्रोतुमिच्छसिकिंवात्वंकिंभूयः कथयामिते मुहूर्तगणपतौ सद्राजाब्राह्मणा
देवसिद्धगंधर्वकिन्नराः २९३ गुरुःश्वेतांबरानारीतेषामाशीश्चदर्शनं श्रीखण्डाक्षतरौप्यंचदर्पणंशैलरोहणं २९४ दृष्टःश्वे
ताहीनादक्षेकेस्यात्समहाधनः २९४ भुवोभूमिधरस्यापिक्रमेणोत्क्षेपणेशुभे मणिसौवर्णरौप्यानांपात्रेवांभोजनीदले
२९५ योऽश्नातिपायसंस्वप्ने सराज्यमधिगच्छति पूजितंशिवलिंगंचददातिविपुलंधनं २९६ बृहद्यात्रायांवराहः चंद्रता
रार्कग्रसनंपरिमार्गणएवच हस्तिनीवडवानांचगवांचप्रसवोगृहे २९७ परस्त्रीणांतथालाभस्तथालिंगनमेवच बृह
स्पतिः शिरसःस्रवतेयस्यस्वप्नांतेरुधिरेणच २९८ शीघ्रंसूर्योदयेतस्यभवेद्राज्याभिषेचनं यस्तुपश्यतिस्वप्नांतेगंगा
यमुनासरस्वति २९९ अरुंधतीतथासीतातस्यसौख्यंनिरंतरं मनुष्यमांसंयोभुंक्ते शृणुतस्यापियत्फलं ३०० पादेपंचत
तोलाभः सहस्रंबाहुभक्षणे राज्यंशत्त्रावशिरसोभक्षणेलभतेऽभवन् ३०१ जलौकादष्टमात्रेणाक्षिप्रंलाभोभविष्यति
दधिलाभेभवेदर्थोघृतलाभेभवेद्यशः ३०२ घृतप्राशेभवेत्क्लेशोयशस्तुदधिभक्षणे दधिदृष्टाभवेदायुस्स्वप्नमध्येनसंशयः
३०३ पंचशब्दस्यनिर्घोषंराज्यंनगरभूषणं यदिपश्यतिस्वप्नांतेवसुधाव्रीहिमुत्तमं ३०४ यानमासनसस्थाप्रतिष्ठामु
त्तमंतथा यदिपश्यतिस्वप्नांतेवसुधाव्रीहिमुत्तमं ३०५ कन्यासमूहंस्थितमण्डलानांवेदासमूहंद्विजशोभनीनां शास्त्रस
मूहस्थितमुत्तमानांएतानिपश्येच्छुभमंगलानि ३०६ संक्षेपेणपराशरः स्वांगप्रज्वलनंपरोपशमनंशक्रध्वजालिंग
कृत्संयुक्तापिनरैर्विपत्यचविपत्प्रक्षेपणंदिक्षुच बद्धोवानिगडैर्ग्रसेच्चदहनंनारीक्षितोबाहुनाछत्रंवाद्विरदादिरोहणविधो
दिव्योऽपिचब्राह्मणः ३०७ दिनकरशशितारा भक्षणस्पर्शनानिविशरणमपिमूर्ध्नः सप्तपंचत्रिधावा वृषभगृहनरेन्द्रश्वेतसिं
हाधिरोहाग्रसनमुदधिभूमौभूमिराज्यप्रदानि ३०८ विपुलरणविमर्दद्यूतवादेजयश्चपशुमृगमनुजानांलब्धिरध्यासनंवा वि
वसनपरिलोपोगम्यनारीगमोवास्वमरणशिखिलाभः सम्यसंदर्शनंच ३०९ सितसुरभिमनोज्ञालेपमाल्यांबराणांद्विजसुर

गुरुराज्ञादर्शनंत्पाशिषश्च मणिरजतसुवर्णभोजपात्रेषुभुंक्ते घृतदधिपरमान्नंसर्वमेतच्छुभंच ३१० श्वेतसूक्ष्मविरवप्रशस्ता
हृतवसनशृंगारव्यजनासितचामरध्वजाभयद्विरदपायसदधिप्राशस्तसितकुसुमनवसस्यलाभोऽर्थलाभाय ३११ वराह: अ
त्रैवंवेष्टितंभूमौनिर्मलंगगनंतथा अंभसात्वभिषेकश्चज्ञेयराज्यप्रदंहितत् ३१२ मुखेनदोहनंशस्तंमहिषीणांतथागवाम्
सिंहिनांहस्तिनीनांच वडवानांतथैवच ३१३ निगडैर्बंधनंचैवतथाविष्टानुलेपनं तथोदकानांतरणंतथाविषमलंघनं ३१४
विष्णुधर्मोत्तरे एकस्यांयदिवारात्रौ शुभंवायदिवाशुभं ३१५ पश्चाद्दृश्येतयत्तत्रतस्यपाकंविनिर्दिशेत् तस्मात्तुशोभनः
स्वप्नोपश्चाज्ज्ञेयोनसंशयः ३१६ अथमत्स्यपुराणेअग्निपुराणेप्येवमेवपाठः शैलप्रासादनागाश्ववृषभारोहणंहितं
द्रुमाणांश्वेतपुष्पाणांगमनेचतथाद्विज १७ द्रुमतृणोद्भवोनाभौतथैवबहुबाहुना तथैवबहुशीर्षत्वंफलितोद्भवएवच ३१८
सुशुक्लमाल्य धारित्वंसुशुक्लांबरधारिणा चंद्रार्कताराग्रसनंपरिमार्जनमेवच ३१९ शक्रध्वजालिंगनंचतदुच्छ्रायक्रिया
तथा भूम्यंबुधेराग्रसनं शत्रूणांचवधक्रिया ३२० जयोविवादेद्यूतेचसंग्रामेचतथाद्विज भक्षणंचार्द्रमासानांमत्स्यानां
पायसस्यच ३२१ दर्शनंरुधिरस्यापिस्नानंवारुधिरेणच सुरारुधिरमद्यानांपानंक्षीरस्यचाथवा ३२२ अंत्रैर्विचेष्टितंभूमौ
निर्मलंगमनंतथा मुखेनदोहनंशस्तंमहिषीणांतथागवां ३२३ सिंहिनांहस्तिनीनांच वडवानांतथैवच प्रासादादेव
विप्रेभ्योगुरुभ्यश्चतथाशुभः ३२४ अंभसात्वभिषेकश्च गवांशृंगान्स्रुवेणच चंद्राद्भ्रष्टेनवाराजन्ज्ञेयोराज्यप्रदोहिसः
३२५ राज्याभिषेकश्चतथाछेदनंशिरसस्तथा मरणंवह्निदाहश्च वह्निदाहोग्रहादिषु ३२६ लब्धिश्चराज्यलिंगानांतं
त्रीवाद्याभिवादनं तथोदकानांतरणंतथाविषमलंघनं ३२७ हस्तिनीवडवानांचगवांचप्रसवोगृहे आरोहणमथाश्वा
नांरोदनंचतथाशुभं ३२८ वरस्त्रीणांतथालाभस्तथालिंगनमेवच निगडैर्बंधनंधन्यंतथाविष्टानुलेपनं ३२९ जीवतां
भूमिपालानांसुहृदामपिदर्शनं दर्शनंदेवतार्चानांविमलानांतथांभसां ३३० शुभान्यथैतानिनरस्तुदृष्ट्वा प्राप्नोतियत्ना

द्धलमर्थलाभं स्वप्नानिवैधर्मभृतांवरिष्टव्याधेर्विमोक्षंचतथातुरोऽपि ३३१ अथजयप्रास्यर्थपरशुरामसुस्वप्नानि ब्र
ह्मवैवर्त्तेगणेशखण्डे सुखायपुष्पशय्यायांकिंकरैःपरिसेवितः निद्रांययौपरिश्रांतःपरमानंदसंयुतः ३३२ निशाति
शेषेसभृगुश्चारुस्वप्नंददर्शह नचिंतितंयन्मनसावायुपित्तकफंविना ३३३ गजाश्वशैलप्रासादगोवृक्षफलितेषुच आरु
ह्ययानमात्मानंरुदंतंकृमिभक्षितं ३३४ आरुह्ययानमात्मानंनौकायांचंदनोक्षितं धृतवंतंपुष्पमालाशोभितंपीतवास-
सा ३३५ विण्मूत्रोक्षितसर्वांगंवशापूर्वसमन्वितं वीणावरांवादयंतमात्मानंचददर्शह ३३६ परिपक्वफलंक्षीरमुष्णान्नंश
करान्वितं स्वस्तिकंभुक्तवंतंचस्वंददर्शचपुनःपुनः ३३७ विस्तीर्णपद्मपत्रांश्चसददर्शनदीतटे दध्याज्यमधुसंयुक्तंभुक्तवं
तंचपायसं ३३८ भुक्तवंतंचतांबूलंलभंतंब्राह्मणाशिषं फलपुष्पप्रदीपंचपश्यंतंस्वंददर्शह ३३९ जलौकसावृश्चिकेनमी
नेनभुजगेनच भक्षितंभीतमात्मानंपलायंतंददर्शसः ३४० ततोददर्शचात्मानंमण्डलंचंद्रसूर्ययोः पतिपुत्रवतीनारीपश्यं
तंसास्मितंद्विजं ३४१ सुवेषयाकन्यकयासास्मितेनद्विजेनच ददर्शाश्लिष्टमात्मानंतुष्टेनपरितुष्टया ३४१ फलितंपुष्पि-
तंवृक्षंदेवताप्रतिमांनृपं गजस्थंचरथस्थंचपश्यंतंस्वंददर्शह ३४२ पीतवस्त्रपरीधानारत्नालंकारभूषितां विशंतींब्राह्म-
णींगेहंपश्यंतंस्वंददर्शह ३४३ शंखंचस्फाटिकींश्वेतांमालांमुक्तांचचंदनं सुवर्णंराजतंरत्नंपश्यंतंस्वंददर्शह ३४४ गजंवृ
षंचसर्पंचश्वेतंचश्वेतचामरं नीलोत्पलंदर्पणंचभृगुःस्वप्नेददर्शह ३४५ रथस्थंनवरत्नंचमालतीमालभूषिता रत्नसिंहा
सनस्थंचभृगुःस्वप्नेददर्शह ३४६ सुधावृष्टिंपर्णवृष्टिंफलवृष्टिंचशाश्वतीं पुष्पचंदनवृष्टिंचभृगुःस्वप्नेददर्शह ३४७ सद्यो
मांसंजीवमत्स्यंमयूरंश्वेतचामरं सरोवरंचतीर्थानिभृगुःस्वप्नेददर्शह ३४८ पारावतंशुकंचाशंखंचिल्लंचचातकं व्याघ्रं
शीघ्रंचसुरभींभृगुःस्वप्नेददर्शह ३४९ यवगोधूमचूर्णानांपिष्टानांलड्डुकानिच भृगुर्ददर्शस्वप्नेचबुभुजेचपुनःपुनः ३५०
दिव्यवस्त्रपरीधानोदिव्यभूषणभूषितः अगम्यागमनंस्वप्नेचकारभृगुनंदनः ३५१ पक्षिणांपीतवर्णानांमानुष्याणांचना

रद॰: मांसानि बुभुजेरामोहृष्टःस्वप्नेऽरुणोदये ३५२ अकस्मान्निगडेर्बद्धंक्षतंशस्त्रेणसभृगुः दृष्ट्वाचबुभुजेप्रातःसमु
त्तस्थौहरिंस्मरन् ३५३ अतीवहृष्टःस्वप्नेनप्रातःकृत्यंचकारसः मनसाबुबुधेसर्वंविजेष्यामिरिपुंध्रुवं ३५४ अथपु
नप्राप्तयेइंदुमतीशुभस्वप्नं पाश्चभूम्युत्तरे साचइंदुमतीराज्ञीगर्भपापफलाशिनात् दत्तात्रेयस्यवचनाद्दिव्यतेजःस
मन्वितं ३५५ इन्दुमत्यामहाभागस्वप्नंदृष्टमनुत्तमं रात्रौदेवान्वितंतावद्बहुमंगलदायकं ३५६ गृहांतरेविशंतंच
पुरुषंसूर्यसन्निभं मुक्तमालान्वितंविप्रंश्वेतवस्त्रेणशोभितं ३५७ श्वेतवस्त्रावृतामालातस्यकण्ठेविराजते सर्वा
भरणासर्वांगोदिव्यगंधानुलेपनः ३५८ चतुर्भुजःशंखपाणिर्गदाचक्रासिधारकः छत्रेणध्रियमाणेनचन्द्रबिंबानु
कारिणा ३५९ शोभमानोमहातेजादिव्याभरणभूषितः हारकंकणकेयूरैर्नूपुराभ्यांविराजितः ३६० चंद्रबिंबानुका
राभ्यांकुण्डलाभ्यांविराजितः एवंविधोमहाप्राज्ञःकश्चित्पुमान्समागतः ३६१ इन्दुमतींसमाहूयस्नापितापयसातः
दा शंखेनक्षीरपूर्णेनहंसवर्णेनभाविनी ३६२ रक्तकंचीनबद्धेनसम्पूर्णेनपुनःपुनः श्वेतंनागंसुरूपंचसहस्रशिरसं
वरं ३६३ महामणिसुसंदीसंज्वालामालासमाकुलं क्षिप्तंतेनमुखंप्रातेदत्तंमुक्ताफलंपुनः ३६४ कण्ठेतस्यासदे
वेशइन्दुमत्यामहायशाः हस्तपद्मंततोदत्वास्वस्थानंप्रतिजग्मिवान् ३६५ एवंविधमहास्वप्नंतयादृष्टंसुतोत्तम स
माचष्टेमहास्वप्नंभर्त्तारंभूपतिंप्रति ३६६ समाकर्ण्यमहाराजश्चिंतयामासवैपुनः समाहूयगुरुंपश्चात्कथितंस्वप्न
मुत्तमं ३६७ शौनकंसुमहाभागंसर्वज्ञंज्ञानिनांवरं राजोवाच अर्धरात्रौमहाभागममपत्न्याद्विजोत्तम ३६८
विप्रोगेहंविशन्दृष्टःकिमिदंस्वप्नकारणं शौनकउवाच वरोदत्तस्तुतेपूर्वंदत्तात्रेयेणधीमता आवश्यकंफलंराज्ञ्यै
सगुणसुतहेतवे ३६९ तत्फलंकिंकृतंराजन्कस्यैत्वयानियोजितं स्वभार्यायैमयादत्तंइतिराज्ञोदितंवचः ३७० श्रु
त्वोवाचमहाप्राज्ञःशौनकोद्विजसत्तमः वृत्तांतंस्वप्नभावेनतवगेहेसुरोत्तमः ३७१ वैष्णवांशेनसंयुक्तोभविष्यति

नसंशयः स्वप्नस्यकारणंराजन्नेतत्तेकथितंमया ३७२ इन्द्रोपेन्द्रसमोपेततवपुत्रोभविष्यति पुत्रस्तेसर्वधर्मात्मा
सोमवंशस्यभूषणः ३७३ धनुर्वेदेसवेदेचसगुणोऽसौभविष्यति एवमुक्त्वासराजानंशौनकोगतवान्गृहं ३७४ हर्षे
णमहताविष्टोराजाभूत्सहभार्यया ३७५ एषतेकथितोब्रह्मन्सुस्वप्नःपुण्यहेतुकः श्रोतुमिच्छसिकिंभूयस्तत्सर्वंकथया
मिते ३७६ इतिश्रीहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधेनवमेस्वप्नमार्तंडाध्यायेसुस्वप्नकथननिरूपणनामप्र
करणंद्वितीयं २ अथदुःस्वप्नफलप्रकरणं उक्तंचकृष्णजन्मखण्डे नंदउवाच श्रुतंसर्वंमहाभागदुःस्वप्नंकथयप्रभो
उवाचतंवैभगवान्श्रूयतामितितद्वचः ३७७ श्रीभगवानुवाच स्वप्नेहसतियोहर्षाद्विवाहंयदिपश्यति नर्तनंगीतमिष्टंचवि
पत्तितस्यनिश्चितं ३७८ दंतायस्यविपाड्यंतेविचरंतंचपश्यति धनहानिर्भवेत्तस्यपीडाचापिशरीरजा ३७९ अभ्यंगितस्तु
तैलेनयोगच्छेद्दक्षिणांदिशम् खरोष्ट्रमहिषारूढोमृत्युस्तस्यनसंशयः ३८० स्वप्नेकर्णेजपापुष्पमशोकंकरवीरकम् विपत्ति
स्तस्यतैलंचलवणंयदिपश्यति ३८१ नग्नांकृष्णांछिन्ननासांशूद्रस्यविधवांतथा कपर्दकंतालफलंदृष्ट्वाशोकमवाप्नुयात् ३
८२ देवतायत्रनृत्यंतिगायंतिचहसंतिच आस्फोटयंतिधावंतितस्यदेहोमरिष्यति ३८३ स्वप्नेरुष्टब्राह्मणंचब्राह्मणींको
पसंयुताम् विपत्तिश्चभवेत्तस्यलक्ष्मीर्यातिगृहाद्ध्रुवम् ३८४ वनपुष्पंरक्तपुष्पंपलाशंचसुपुष्पितम् कार्पासंशुक्लवस्त्रंचदृष्ट्वा
दुःखमवाप्नुयात् ३८५ गायंतींचहसंतींचकृष्णांबरधरास्त्रियम् दृष्ट्वाकृष्णांचविधवांनरोमृत्युमवाप्नुयात् ३८६ मृतवत्सं
चमुण्डंचमृगस्यचनरस्यच यःप्राप्नोत्यस्थिमालांचविपत्तिस्तस्यनिश्चितम् ३८७ रथंखरोष्ट्रसंयुक्तमेकाकीयोधिरोहये
त् तत्रस्थोऽपिचजागर्तिमृत्युरेवनसंशयः ३८८ अभ्यंगितस्तुहविषाक्षीरेणमधुनापिच तक्रेणापिगुडेनैवपीडातस्यवि
निश्चितम् ३८९ रक्तांबरधरांनारीरक्तमाल्यानुलेपनाम् उपगूहतियःस्वप्नेतस्यव्याधिर्विनिश्चितम् ३९० पतितान्नखके
शांश्चनिर्वाणांगारमेवच भस्मपूर्णांचितांदृष्ट्वालभतेमृत्युमेवच ३९१ श्मशानंशुष्ककाष्ठंचतृणानिलोहमेवच शमींचकिं

चित्कृष्णाश्वंदृष्ट्वादुःस्वंलभेत्ध्रुवम् ३९२ पादुकांफलकंरक्तंपुष्पमाल्यंभयानकम् माषंमसूरंमुद्गंवादृष्ट्वासद्योव्रणंलभेत्
३९३ कटकंसरठंकाकंभल्लुकंवानरंगवम् पूयंगात्रमलंस्वप्नेकेवलंव्याधिकारणम् ३९४ भग्नभाण्डंक्षतंशूद्रंगलत्कुष्ठंच
रोगिणम् रक्तांबरंचजटिलंसूकरंमहिषंखरम् ३९५ अंधकारंमहाघोरंमृतंजीवंभयंकरम् दृष्ट्वास्वप्नेयोनिलिंगंविपत्तिंलभ
तेध्रुवम् ३९६ कुवेषरूपंम्लेच्छंचयमदूतंभयंकरम् पाशहस्तंपाशशस्त्रंदृष्ट्वामृत्युंलभेन्नरः ३९७ ब्राह्मणोब्राह्मणीबालाना
लकोवासुतःसुता विलापंकुरुतेकोपात्दृष्ट्वादुःखमवाप्नुयात् ३९८ कृष्णपुष्पंचतन्माल्यंसस्यंशस्त्रास्त्रधारिणम् म्लेच्छांचवि
कृताकारांदृष्ट्वामृत्युंलभेत्ध्रुवम् ३९९ छिन्नंवापिकबंधंवाविकृतंमुक्तकेशिनम् मृदंगंवाद्यमानंतदृष्ट्वादुःखंलभेत्ध्रुवम् ४००
मत्स्यादिधारयेद्योहितद्भ्रातुर्मरणंध्रुवम् वाद्यंचनर्तनंगीतंगायनंरक्तवाससम् ४०१ क्षिप्रंनृत्यंचकुर्वंतंदृष्ट्वामृत्युंलभेन्न-
रः मृतोवापिमृतावापिकृष्णाम्लेच्छाभयानका ४०२ उपगूह्यतियःस्वप्नेतस्यमृत्युर्विनिश्चितम् येषांदंताश्चभग्नाश्चकेशा
श्चापिपतंतिहि ४०३ धनहानिर्भवेत्तस्यपीडावातच्छ रीरजा उपद्रवंतियंस्वप्नेशृंगिणोदंष्ट्रिणोऽपिवा ४०४ बालका
मानवाश्चैवतस्यराजकुलाद्भयम् छिन्नवृक्षंपतंतंचशिलावृष्टिंतुषंक्षुरम् ४०५ रक्तांगारंभस्मवृष्टिंदृष्ट्वादुःखमवाप्नुयात्
गृहंपतंतंशैलंवाधूमकेतुंभयानकम् ४०६ भग्नस्कंधंनरंवापिदृष्ट्वादुःखमवाप्नुयात् रथगेहशैलवृक्षगोहस्तितुरंगाबरात्
४०७ भूमौपततियःस्वप्नेविपत्तिस्तस्यनिश्चितम् उच्चैःपतंतिगर्तेषुभस्मांगारयुतेषुच ४०८ क्षारकुण्डेषुचूर्णेषुमृत्युस्ते
षांनसंशयः बलाद्गृण्हातिदुष्टश्चछत्रंचयस्यमस्तकात् ४०९ पितुर्नाशोभवेत्तस्यगुरोर्वापिनृपस्यवा सुरभिर्यस्यगेहाच्च
यातित्रस्तासवत्सिका ४०१ प्रयातिपापिनस्तस्यलक्ष्मीरपिवसुंधरा पाशेनकृत्वाबद्धंचयंगृहीत्वाप्रयातिच ४०२ यमदू
ताश्चयेम्लेच्छास्तस्यमृत्युर्विनिश्चितम् गणकोब्राह्मणोवापिब्राह्मणीवागुरुस्तथा ४०३ परिरुष्टःशपतियंविपत्तिस्तस्य
निश्चितम् विरोधिनश्चकाकाश्चकुक्कुटाभल्लुकारतथा ४०४ पतंत्यागत्ययद्गात्रेतस्यमृत्युर्नसंशयः महिषाभल्लुकार

श्वासूकरगर्दभास्तथा ४०५ रुक्षाधावंतियंस्वप्नेसरोगीनिश्चितंभवेत् मात्स्ये मनुरुवाच स्वप्नाख्यातंकथंदेवगमने
प्रत्युपस्थिते ४०६ दृश्यंतेविविधाकाराःकथंतेषांफलंलभेत् मत्स्यउवाच इदानींकथयिष्यामिनिमित्तंस्वप्नदर्शी
ने ४०७ नाभिंविनान्यगात्रेषुतृणवृक्षसमुद्भवः चूर्णनंमूर्ध्निकांस्यानांमुंडनंनग्नतातथा ४०८ मलिनांबरधारित्व
मभ्यंगाःपंकदिग्धता उच्चात्प्रपतनंचैवदोलारोहणमेवच ४०९ अर्जनंपंकलोहानांहयानामपिमारणं रक्तपुष्पद्रुमा
णांत्वमण्डलस्यतथैवच ४१० वराहर्क्षखरोष्ट्राणांतथावारोहणंक्रिया भक्षणंपक्वमांसानांतैलस्यकृशरस्यच ४११ न
र्तनंहसनंचैवविवाहोगीतमेवच तंत्रीवाद्यविहीनानांवाद्यानामपिवादनं ४१२ स्रोतोवहाधोगमनंस्नानंगोमयवारिणा
पंकोदकेनचतथामहीतोयेनचाप्यथ ४१३ मातुःप्रवेशोजठरेचितारोहणमेवच शक्रध्वजानांपतनंपतनंशशिसू
र्ययोः ४१४ दिव्यांतरिक्षभौमानामुत्पातानांचदर्शनं देवद्विजातिभूपालगुरूणांक्रोधएवच ४१५ आलिंगनंकुमा
रीणांपुरुषाणांचमैथुनं हानिश्चैवस्वगात्राणांविरेकवमनक्रिया ४१६ दक्षिणाशाभिगमनंव्याधिनाभिभवस्तथा फ
लापहानिश्चतथाफलितानामकारणात् ४१७ गृहाणांपतनंचैवगृहसंमार्जनंतथा क्रीडापिशाचक्रव्यादवानरांत्य
नरैरपि ४१८ परादभिभवश्चैवतस्माच्चव्यसनोद्भवः काषायवस्त्रधारित्वंतद्वत्स्त्रीक्रीडनंतथा ४१९ स्नेहपानावगा
होचरक्तमाल्यानुलेपनं एवमादीनिचान्यानिस्वप्नानिद्विजनिर्दिशेत् ४२० एषामकथनंधन्यंभूयःप्रस्वापनंतथा
मार्कण्डेयः बाल्यांमूत्रंपुरीषंतुसुवर्णरजतंतथा ४२१ प्रत्यक्षमथवास्वप्नेजीवेतदशमासिकं करालैर्विकटैःकृष्णैः
पुरुषैरुद्यतायुधैः ४२२ पाषाणैस्ताड्यतेस्वप्नेसद्योमृत्युर्भवेन्नरः केशांगारंतथाभस्मउरगंनिर्जलांनदीं ४२३ दृष्ट्वा
स्वप्नेदशाहात्तुमृत्युरेकादशेदिने रक्तकृष्णांबरधरागायन्तिचहसंतिच ४२४ दक्षिणाशांनयेन्नारीस्वप्नेसोऽपिनजीव
ति यस्तुप्रावरणंशुक्लंस्वप्नेपश्यतिमानवः कृष्णारक्तमपिस्वप्नेतस्यमृत्युरुपस्थितः ४२५ देवलः श्वभ्रेयोनिपत्ते

त्स्वप्ने द्वारं चास्य पिधीयते नचोत्तिष्ठति यत्तस्मात्त्वन्तं तस्य जीवितं ४२६ कलावत्यां लोहदण्डयुतं कृष्णं नरं कृ
ष्णापरिच्छदं स्वप्ने च पार्श्वतो दृष्ट्वा त्रिरात्रान्मृत्युमादिशेत् ४२७ वायुलिंगपुराणयोः मुक्तकेशो हसंश्चैव गायते नृत्य
ते नरः याम्यां दिशमथो गच्छेत्तदं तं तस्य जीवितं ४२८ अयोध्याकाण्डे भरतः दृष्टो मयाद्य स्वप्ने वै चंद्रमाः पतितः
क्षितौ सीदंतं च तथा द्राक्षं पंके मग्नं महागजं ४२९ विशीर्यमाणः शैलेन्द्रो भग्नश्चात्र महाद्रुमः स्वप्ने चाद्य मया दृष्टो
निपतंश्च महाध्वजः ४३० सुंदरकाण्डे त्रिजटास्वप्नः कण्ठबध्वा दशग्रीवं प्रमदा रक्तवासिनी काली कमलपत्रा
क्षी दिशं याम्यां प्रकर्षति ४३१ लंका चेयं पुरी कृत्स्ना स वाजिरथकुंजरा सागरे पतिता दृष्टा मया स पुरतोरणा ४३२
नंदिपुराणे त्रिपुरवधे मयाद्य दृष्टः स्वप्नांते पिनाकी क्रोधमूर्छितः उदरेऽस्य पुरी कृत्स्ना विवेशायतिवेगतः ४३३ परो
शारदेवलो रक्तगंधप्रलिप्तांगो रक्तमाल्योपशोभितः तैलाभ्यक्तोतिपीतश्च मुण्डितो रक्तवस्त्रधृक् ४३४ खरोष्ट्रम
हिषारूढो वेगाद्दक्षिणमाव्रजेत् स्वात्मा च दृश्यते स्वप्ने त्रिमासान्नाभिजीवति ४३५ मुहूर्तगणपतौ पाकस्थाने वनेरक्त
पुष्पादे सूतिकागृहे विकलांगो विशत्स्वप्ने सोऽसुर्नाविप्रयुज्यते ४३६ जतुकौंकुमसिंदूरधातवो यस्य मंदिरे पतंति त
रुतस्तस्य गेहदाहश्च भीरुभिः ४३७ नाभेरन्यत्र गात्रेषु तृणपुष्पद्रुमोद्गमः खरोष्ट्रकपिसर्पाद्यैर्यानं स्नेहस्य भक्षणं ४
३८ पातो दग्धतहस्तस्य जिह्वायाश्चत्रयस्तथा एते शोकप्रदाः स्वप्नाद्दृष्टाहानिकरा अपि ४३९ स्वप्ने संदोलनं गीतं
क्रीडितं स्फोटितं तथा हसितं भूषितं स्रोतोवहानीरैरधोगतं ४४० कलुषेनांबुना मण्यास्नानं स्वस्य चित्ता अपि रज्जा
छेदः शिरोभंगे कांस्यचूर्णस्य धारणं ४४१ प्रवेशो जननीगर्भे दृष्टमेतत्त्वरिष्टदं करवीरमशोकं च लतापात्रोनबंधनं ४
४२ आरुह्य पुष्पितान्वृक्षान्यो विचिंत्य निजं वपुः भूषयत्यरुणैः पुष्पैः सोऽपि प्राणैर्वियुज्यते ४४३ यस्तु धूमितमा
त्मानं व्याप्तं धूमेन वेक्षते भस्मात्यलोहलाभं च स च लक्ष्म्या वियुज्यते ४४४ रत्नद्रव्यं युधोपानच्छाया भूषाश्च योषितां

वस्त्रादिप्रियवस्तूनांअपहारोऽर्थनाशकः ४४५ विवाहोत्सवयोःशोकेभ्रंशेवानरखकेशयोः कराद्यवयवानांतुछे
दनेस्वस्यनाशनं ४४६ वपनंश्मश्रुकेशानांनेत्ररुक्पतनंतथा कूपगर्तदराध्वांतविवरेषुनशोभनं ४४७ क्रोष्टुकु
कुटमार्जारगोधाबभ्रुभुजंगमः मक्षिकावृश्चिकादंशाद्दष्टास्वप्नेनशोभनाः ४४८ कपोतश्येनगृध्राद्यऋक्षकौशिकवा
यसाः शृगालशशकश्वानोदृष्टास्वप्नेनशोभनाः ४४९ शाल्लीकृशराश्राणगुडापूपादिभक्षणं गोमयंचोष्णपानी
यंस्वप्नेपीतंनशोभनं ४५० रक्तेपुरीषमूत्रेवास्त्रवन्मृत्युमवाप्नुयात् रक्तकृष्णानिवासांसिपुष्पाणिचबिभर्त्तियः ४५१
पितृकार्यंप्रकुर्वाणोम्रियतेसनसंशयः भूतप्रेतपिशाचाद्यैःश्वपचैःसहसंगतः ४५२ आहतोवाथतैर्याभ्यांस्वल्पाहे
म्रियतेतुसः असूर्यंदिवसंरात्रिंविचंद्रागततारकं ४५३ वृष्ट्योऽकालजापश्येत्स्वप्नेसोऽपिविनश्यति सीरपीतकल
स्तीरकांस्यताम्रायसंत्रपुः ४५४ शुष्कवृक्षौषधंशिल्पिदृष्टाश्चैतेनशोभनः तारकोलाहलाह्वानांनन्दःक्रोष्टादिसंस्त्र
वात् ४५५ विद्याद्राजभयंदृष्टिःशृंगीकोशाद्यभिद्रवात् बार्हस्पत्ये वनपक्षीपशूनांचप्रवेशोन्तःपुरेनसत् ४५६
हिमवंतंचकैलासंकेदारंमहिपूजितं यदिपश्यतिस्वप्नांतेपितरःक्षयगामिनः ४५७ सोमनाथंप्रयागंचगंगायांपिण्ड
मुद्रिंदं यदिपश्यतिस्वप्नांतेपितरःक्षयमानसः ४५८ मशकैर्मक्षिकैर्दंशैःखादंतेवेश्यंतिच स्वप्नांतेपुरुषंयंचसत्रासं
लभतेध्रुवं ४५९ उपानहौतुयोदत्तेलब्धाप्रतिविबुध्यते ग्रासहानिर्मलंदीर्घमध्वानंतस्यनिर्दिशेत् ४६० केशायस्य
विशीर्यंतेदंतायस्यपतंतिच धननाशोवसातैलघृतैःस्नानंचरोगकृत् ४६१ कृष्णरक्तनीलपीतहरितांबरचंदने एषाम
न्यतमंधृत्वाऽलिंगनाद्धानिमादिशेत् ४६२ चकोरंचक्रवाकंचवियुक्तंजलसन्निधौ यदिपश्यतिस्वप्नांतेनित्यंकलहंमे
वच ४६३ भूमिकंपंदिशादाहंनगरग्रामदाहकं चत्वारितस्यनश्यन्तिआयुःप्रज्ञायशोबलं ४६४ क्षुधापिपासानिद्रा
चआलस्यंचापिनिष्ठुरं यदिपश्यतिस्वप्नांतेदुर्भिक्षंदारुणंभवेत् ४६५ स्वप्नचिंतामणौ विहिताहितायसुधियां